पञ्चमाङ्कः

परिशीलनम्

उत्तरप्रदेशसंस्कृताकादम्याः षाण्मासिक्यनुसन्धानपत्रिका

उत्तर-प्रदेश-संस्कृत-अकादमी, लखनऊ

पञ्चमाङ्कः

परिशीलनम्

उत्तरप्रदेशसंस्कृताकादम्याः षाण्मासिक्यनुसन्धानपत्रिका

वैशाख २०४९तमे वैक्रमाब्दे अकतूबर १९९२

सम्पादकः

प्रो० युगलकिशोरमिश्रः

अध्यक्षः

डॉ. गयाचरणत्रिपाठी

उत्तर-प्रदेश-संस्कृत-अकादमी, लखनऊ

प्रकाशकः

मधुकरद्विवेदी

निदेशकः

उत्तर–प्रदेश–संस्कृत–अकादमी

वार्षिक मूल्यम् : १० रूप्यकाणि

प्राप्तिस्थानम्

विक्रय–विभागः

उत्तर–प्रदेश–संस्कृत–अकादमी

संस्कृत–भवनम् , नया हैदराबाद

लखनऊ–७

मुद्रक :

प्, नार आफ्सेट, लखनऊ

विषयानुक्रमणिका

सम्पादकीयम्	प्रो० युगलकिशोरमिश्रः	१
वेद स्वरूपविनिर्णयः	डॉ. हर्षनारायणः	३
वेदापौरुषेयत्व विमर्शः	डॉ. पारसनाथद्विवेदी	११
वेदमन्येष्वस्मच्छब्दविचारः	म० म० गिरिधरशर्माचतुर्वेदः	१६
वैदिकमाड्.मये रुद्रः	डॉ. मुहम्मदइसराइलखाँ	२५
वैदिक यज्ञसंस्थाया अध्यात्मिकं स्वरूपम्	प्रो० युगलकिशोरमिश्र	३०
वेदेषु प्रकृतिचित्रणस्य सौन्दर्यम्	डॉ. रामनाथवेदालंकार	३६
वेदे राष्ट्रियभावना सांमनस्यंच	श्री मानसिंहः	४७
महाकविकालिदासोपरिवेदानां प्रभावः	आचार्यवेदप्रकाशशास्त्री	५५
मीमांसा जैमिनेरात्मा	पं० पट्टाभिरामशास्त्री	६९

सम्पादकीयम्

परमेश्वरः जगत्स्रष्टा प्रजानां मङ्गलकामनया इष्टप्राप्त्यनिष्टपरिहारोपायप्रतिपादकं वेदशास्त्रं सर्वतः प्रथमं प्रकटयांचकार। तदिदं वेदशास्त्रं नित्यम् अपौरुषेयंचेति 'शास्त्रयोनित्वात्' 'अतएव च नित्यत्वम्' इत्यादिभिः सूत्रैः समुपदिष्टम्। यथेदानीं मानवाः न जानन्ति कुत्र को वेदभागः प्रादुरभूदिति तथैवास्माकं पूर्वजा अपि न जानन्ति स्म। यतो हि वेदाधिगमस्य गुरुमुखोच्चारणानूच्चारणपरम्परैवानादिकालादद्ययावत् प्रचलिता विद्यते नान्या कापि परम्परा वर्तते। किंचातिविशाले शास्त्रवाङ्मये कुत्रापि नैतादृग्वचनमुपलभ्यते येनेदं विज्ञायेत यदमुं व`दभागमसौ चकार। नैयायिकैरपि परमार्थतः ईश्वरकर्तृत्वमेव वेदस्य स्वीकृतम्। अतश्च पौरुषेयत्वे प्रमाणाभाव एवापौरूषेयत्वे प्रमाणम्। यथा वेदः उपदेशपरम्परया संरक्ष्यमाणोऽनुवर्तते तथा वेदप्रामाण्यनिश्चयोऽपि गुरूपदेशपरम्परयाऽनुवर्तते। किम्बहुना आधुनिकाः पाश्चात्यविचारका अपि विश्वस्मिन् प्राचीनतमो ग्रन्थः ऋग्वेद एवेति समुद्घोषयन्ति। तेन सृष्टेः, ज्ञानस्य, विज्ञानस्य, मानवस्य च रहस्यानुशीलनाय वेदाध्ययनम् तस्य पर्यालोचनंच परमावश्यकमस्ति। अतएवोच्यते–

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते।
वेदाच्छास्त्रं परं नास्ति न दैवं केशवात् परम्॥

याज्ञवल्क्येनापि समुद्घोष्यते–

'न वेदशास्त्रादन्यत् किंचिच्छास्त्रं हि विद्यते।
निःसृतं सर्वशास्त्रं तु वेदशास्त्रात् सनातनात्॥'

केचित्तु, वेदमहिमानमसहमानाः वदन्ति यत् मानवशक्त्यतीतं प्राकृतिकवर्षविद्युदादिकं दर्शं दर्शं समुद्भूतविस्मयानामस्मत्पूर्वजानां भयविस्मयादिचित्तवृत्तिपरिवाहपरिणाम एवायं वेदाख्यः शब्दराशिरिति। परमिदमविचारितरमणीयमेव भवति। यतो हि समययापनाय वा लीलाकौतुकाय वा उन्मत्तवाक्यानीव वा सङ्घटितं शब्दं कथङ्कारमार्याः सुकठिनयम–नियमसाध्ये यजनयाजनादिधर्मे निष्कारणमध्ययनाध्यापनादिधर्मे वा प्रेक्षावन्त अस्मत्पूर्वजाः प्रमाणीकुर्युः?

एवं वेदस्य प्रामाण्ये सति तस्याध्ययनमपरिहार्यम्। न केवलमक्षरराशिग्रहणरूपाध्ययनमात्रं फलाय, अपि तु वेदस्यार्थोऽपि सविधि ज्ञातव्यः अनुसन्धेयश्च। लोके अर्थस्य मुख्यत्वं शब्दस्य गौणत्वम्, किन्तु वेदे शब्दार्थयोरुभयोरपि तुल्यप्राधान्यम्। यतो हि सत्स्वपि पर्यायशब्देषु तदुच्चारणे न फलं वेदे भवतीति तत्र विशिष्टानुपूर्वीकस्य शब्दस्याप्यर्थवत् प्राधान्यम्।

किंच 'तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतत् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः' इत्यादि

श्रुतिवाक्येन परमात्मनः निःश्वासभूतो वेद इत्यभिगम्यते। एवंच सति यथा निःश्वासोच्छ्वासयोरभावे शरीरस्य सत्ता न भवति तथा वेदानामभावे परमेशितुः सत्तापि न भवतीत्यत्र ध्वन्यते।

अथ च रुचीनां वैचित्र्यात् नृणामेको गम्यो विद्यते परमेश्वरपदाभिधेयस्तद्वत् वेदप्रतिपाद्या धर्मा अपि सर्वेषामभ्यर्हणीयाः समुपकारकाश्च विद्यन्ते। यतो हि वेदाः समग्रस्य सृष्टिप्रपंचस्य संविधानभूताः। वेदेषु सन्ति यानि तत्वानि प्रतिपादितानि तानि देवैः सुपरीक्षितानि, आत्मसात्कृतानि च वर्तन्ते। अतश्च प्राणिनां कृते तानि धर्मतत्वानि सुपरीक्षितमौषधमिव महदुपकारकाणि सन्ति। वैदिकधर्मतत्तत्वेषु मुख्यमस्ति यज्ञतत्तम्। सोऽयं यज्ञो द्विविधः प्राकृतो वैकृतश्च। सूर्यचन्द्रादिभिः सततं भाव्यमानः प्राकृतो यज्ञः तदनुकृतितया कल्पादिशास्त्रानुरोधेन मनुष्यैरनुष्ठीयमानो वैकृतः। वैकृतेन यज्ञेन न केवलं स्वर्गादिफलसिद्धिरपि तु प्रकृतिकोपानामुपद्रवाणांच शान्तिरपि साधिता भवति।

इदमप्यवधेयं यद् वैदिकी वाक् कामदुघा विद्यते। अस्यां वाचि आधिभौतिकार्थाः, आधिदैविकार्थाः आध्यात्मिकाश्चार्थाः एकत्र संश्लिष्टाः सन्ति। अतएव पुरातनैर्महर्षिभिः शङ्कराचार्यप्रभृतिभिराचार्यैश्च उच्यते–

"महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य
प्रदीपवत्सर्वार्थवद्योतिनः सर्वज्ञकल्पस्य"

"अनेक शाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादि–प्रविभागहेतोः ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्य"

यास्काचार्येणापि "योऽर्थज्ञ इत्सकलं भद्रमश्नुते" इति श्रुतिवचनानुरोधेन वेदेषु अर्थज्ञानस्य माहात्म्यं प्रदर्श्य बहुविधा वेदार्थविचारसरणिः निरुक्तग्रन्थे साधूदाहृता। वेदार्थज्ञानप्रसङ्गे हीदं विशेषतयाऽवधारणीयं यत् वैदिकाः शब्दाः आधिभौतिकाधिदैविकाध्यात्मिकानर्थानेकत्र धारयन्ति, अतस्तेषामर्थविचारप्रसङ्गे मानवेन बहुश्रुतेन बहुज्ञेन च भाव्यम्। अन्यथा वेदार्थरहस्यं तस्यालौकिकरमणीयत्वं न विज्ञातम्भवेत्। अतश्च महाभारते उक्तम् –
"बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरेदिति"।

विंशतिशताब्द्यां श्रीमधुसूदनओझामहोदयेन दर्शितां श्री पं. मोतीलालशास्त्रिवर्येण म० म० श्री गिरिधरशर्म चतुर्वेद महाभागेन च पल्लवितां वैदिकं विज्ञानपद्धति प्रति विदुषामाकर्षणं जातम्। इयं पद्धतिः न सर्वथा काल्पनिकी प्रत्युत चतुर्दशविद्यास्थानाधारेण परिपुष्टा विद्यते। विद्वद्भिरिन्द्रधनुषोऽनेकवर्णच्छटा इव पवेदार्थवैविध्यमास्वादनीयमाविष्करणीयंच सच्छास्त्रं यथा।

उत्तरप्रदेशसंस्कृताकादम्याः "परिशीलनम्" नाम्नीयं शोधपत्रिका संस्कृतपत्रिकाणां परम्परायां किमपि विशिष्टं स्थानं संश्रयति। परिशीलनस्यायं "वेदविशेषाङ्कः" साक्षात्कृतधर्मभ्य ऋषिभ्यः शुभिकारूपेण संरचितः यत्र देशस्य विशिष्टविदुषां चिन्तनप्रसूनानि ज्ञानविज्ञानसौरभस्मेराणि विराजन्ते। दृढमस्माकं प्रत्ययो यत् उत्तरप्रदेश संस्कृताकादमीयमेवंविधैः सारस्वतोपक्रमैः महीयसीं परम्परां परिपालयन्ती भूयसे लोकमङ्गलाय कल्पिष्यते।

मेषसंक्रान्तिः
दि० 13/4/92

युगलकिशोरमिश्रः
आचार्यो ध्यक्षश्च–वेदविभागस्य
सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः
वाराणसी

वेदस्वरूपविनिर्णयः

डा. हर्षनारायणः

प्रायेण सर्वेऽपि धर्मसम्प्रदायाः दिव्यग्रन्थधारिणः, कुर्आन–भाषायां ग्रन्थिनः (अह्लुऽल् – किताब) इत्याभिधीयमानाः। प्रायेणैव तत्तद्धर्मसम्प्रदाय एक एव धर्मग्रन्थोऽन्ततो व्यवहारतश् च दिव्यग्रन्थसंज्ञां भजते, यथा यहूदीयानां तौरात इत्याख्यो भगवद्दूत–मूसा–दृष्टो ग्रन्थः, ख्रीष्टीयानां भगवदात्मजत्वेन गृहीतेन यीशु–ख्रीष्टेन स्वर्गतेन तच्छिष्येषु संचारित इंजील इत्याख्यो ग्रन्थो मुस्लिमानां कुर्आन इत्याख्यो मुहम्मद श्रुतो ग्रन्थो, "बहाई" इति नूतनधर्मा– वलम्बिनां बहाउऽल्लाह–दृष्टौ किताबे अक्दस इति च किताबे ईक़ान इति चाख्यौ ग्रन्थौ च। हिन्दूनां त्विदं वैशिष्ट्यं यत् तेषामनेकानेकग्रन्था दिव्यग्रन्था धर्मग्रन्थाश्चेति वक्तुं शक्यन्ते।

तथा हि– हिन्दूनां सर्वाणि धर्मदर्शनप्रस्थानानि सर्वाण्यपि च विद्यास्थानानि तत्तत्प्रवर्तकमूलग्रन्थाश्च प्रायशो दिव्या एव, न त्वन्यधर्मावलम्बिनामिव धर्मग्रन्थ एव केवलं तथा। तद् यथा–प्राचीनं वैशेषिकसूत्रमधुना नष्टं स्वयं शिवः प्रणिनायेति कणादसूत्रनिबन्धे भट्टवादीन्द्रः। उपलभ्यमानं वैशेषिकसूत्रमपि शिवेनैवोलूकरूपिणा कणादायोपदिष्टमिति तर्करहस्यदीपिकायां (कलकत्ता, 1905) गुणरत्नः। योगशास्त्रं हिण्यगर्भप्रणीतमिति बहुधा स्मर्यते। "ब्रह्मा प्रजापतये मीमांसां प्रोवाच, सोऽपीन्द्राय, सोऽप्यादित्याय, इति युक्तिस्नेहप्रपूरण्यां" (1.1.1. पृ. 8) रामकृष्णः। पाशुपतं पांचरात्रं च शास्त्रं शिव–विष्णुभ्यां निरमायिषातामिति महाभारते शान्तिपर्वणि (359.65)। नाट्वेदो भगवता प्रवर्तित इति भरतो नाट्यशास्त्रे (1–11–16)। श्रीमद्भागवतानुसारेण, (3.12.38.39) आयुर्वेदो, धनुर्वेदो, गान्धर्ववेदः, स्थापत्यवेद, इतिहास–पुराणानि चापि परमात्मनैव व्यरचिषत। व्याकरणं शिवप्रणीतमिति प्रसिद्धमेव। ऋक्तन्त्रानुसारेण (1.4) तु व्याकरणं ब्रह्मा वृहस्पतये प्रोवाच, वृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः। ज्योतिषशास्त्रं सूर्यदेवता प्रवर्तितमिति सूर्यसिद्धान्तः (1.3–4, 6–7)। शिवपुराणस्य वायवीयसंहितानुसारेण (1.2.7) अष्टादशानां विद्यानामादिकर्ता साक्षाच्छूलपाणिः। श्रीमद्भगवद्गीता भगवद्विग्रहाणामन्यतमस्य वक्त्राद् विनिर्गता। किं बहुना? बृहदारण्यकोपनिषदि (2.4.10) प्रायः सर्वमपि ज्ञानविज्ञानं "लोकात्तरमूलो अस्य महतो भूतस्य निःश्वसितं" इत्याख्यातम्।

धर्मः श्रुतिप्रमाणक इति वदन्ति। श्रुतिश्च द्विविधा–वैदिकी तान्त्रिकी चेति हारीतः मन्वर्थमुक्तावल्याम् (2.1)। उभेऽपि श्रुती लोकोत्तरमूले तान्त्रिक्याः श्रुतेर् लोकोत्तरमूलत्वं तन्त्रग्रन्थेषु कण्ठोक्तप्राप्यते। यथा महानिर्वाणतन्त्रे शिवं प्रति पार्वतीवचनम् –

42/59 रामरत्न बाजपेयी मार्ग नरही, लखनऊ – 226 001

त्वया कृतानि तन्त्राणि जीवोद्धरणहेतवे

निगमागमजातानि भुक्तिमुक्तिकराणि च।

वैदिकी श्रुतिश्च वेद एव।वेदः क इति प्रश्नस् तु दुःसमाधेयः।

तत्रादौ वेदसंज्ञाविचारः प्रवर्तताम् । प्रसिद्धे वैदिक–वाङ्.मये वेद–पदं द्विविधम् – ज्ञानार्थकमाद्युदात्तं कुशमुष्टिनिर्मितयज्ञीयपदार्थ विशेषार्थकमन्तोदात्तं च। यद्यपि वैदिकावाङ्.मये आद्युदात्तवेदपदस्य प्रयोगो यत्र तत्र दृश्यत एव, प्रायेण विकल्पयोगेन तथाऽपि तत्रान्तोदात्तवेदपदस्यैव निर्वचनं दृष्टम् । तद् यथा–"तां (वेदिं) वेदेनान्वविन्दस् तद् वेदस्य वेदत्वम्"(मैत्राय.सं.4.1.13) इति। तत्र तु धर्मग्रन्थभूत–वेदस्य स्वरूपमवधारणीयम् । अत्र बह्व्यौ विप्रतिपत्तयो दृश्यन्ते।

सामान्य–विशेष–भेदेन वेद–पदस्य द्वावर्थौ प्रत्येतव्यौ। तस्य सामान्यार्थौ ज्ञानं वा विद्या वा, विशिष्टार्थश्च धर्मग्रन्थविशेषपरो धर्मग्रन्थराशिविशेषपरो वा। तद्धर्मग्रन्थस्य तद्राशेर् वा इदन्तेयत्ते दुर्निर्णेये। सम्प्रदायोऽस्ति–

आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः इति वायुविष्णवादिपुराणवचनम् (यथा वायु. 1.60.6) विष्णुपुराणानुसारेणैव चतुर्धा विभक्तो वेदः शाखाशतैर् विभागं गच्छति–

वेदमेकं चतुर्वेदं कृत्वा शाखाशतैर् विभुः

इति। वस्तुतस्तु वेदशाखाभेदाः सहस्रशोऽभूवन् नित्याभाति, किं तु प्रायशत त्रिंशदधिकशता धिकसहस्रशाखानामेव परिगणनं सम्प्रत्युपलभ्यते। तथा च पतंजलि महाभाष्ये (पस्पशा)... चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः – एकशतमध्वर्यु शाखा, सहस्रवर्त्मा सामवेद, एकविंशतिधा बाह्वृच्यं, नवधाऽथर्वणो वेद :... इति। मुक्तिकोपनिषदि (1.12.13) तु शाखाभेदा एवं वर्गीकृताः –

ऋग्वेदस्य तु शाखाः स्युरेकविंशतिसङ्.ख्यकाः,

नवाधिकशतं शाखा यजुषो मारुतात्मज

सहस्रसङ्.ख्यया जाताः शाखा साम्नः परन्तप

अथर्वणस्य शाखाः स्युः पंचाशद्भेदतो हरे।

अन्यत्रापि शाखासङ्.ख्याविषये बह्व्यो विप्रतिपत्तयः सम्मुखीना भवन्ति। तत्र पतंजलेरेव विवरणं प्रामाणिकतमतया गृह्यत इदानीम् । वल्लभाचार्यकाले तु एकादशैव शाखाः प्रचलिता आसन् , शेषास्तु प्रणष्टा अभूवन् । उक्तंच तेन एकादशशाखाः साम्प्रतं प्रचरन्ति ...। (तत्वार्थदीपनिबन्धः, शास्त्रार्थप्रकरणम् , श्लोकः 82, वृत्तिः, पृष्ठः 277)

का स्थितिरस्मत्काले? प्रथमं तावच्छाखाया इयत्ता विचिन्त्यताम् । तत्र काश्चिद् वेदशाखा अनुशाखावत्य इति पुराणादवगम्यते। तद् यथा विष्णुपुराणे (3.4.25)–

इत्येताः प्रतिशाखाभ्योऽप्यनुशाखा द्विजोत्तम।

अस्तु, प्रत्येका शाखाऽनुशाखा वा ईदृशं विभक्ता–

1– मन्त्रसंहिता

2– ब्राह्मणमनुब्राह्मणं च/वा

3– आरण्यकम्

4– उपनिषद्

5– कल्पोऽनुकल्पोश्च/वा

अद्यत्वे तु नैकोऽपि शाखा पूर्णा पंचागंवती उपलभ्यते। साम्प्रतमृग्वेदस्य शैशिरीयशाकलसंहितैवैका ऋग्वेदत्वेन प्रसिद्धोपलभ्यते ऐतरेयब्राह्मणारण्यकोपनिषद्वती शुक्ल–कृष्ण–भेद–भिन्नस्य यजुर्वेदस्य माध्यन्दिनवाजसनेयि–काण्व–संहिते द्वे सब्राह्मणारण्यकोपनिषत्के वर्तेते शुक्लयजुर्वेदान्तर्गते। कृष्णयजुर्वेदान्तर्गतास्तु तैत्तिरीय–मैत्रायणी–कठ–कपिष्ठलकठ–श्वेताश्वतरप्रख्याः पंच संहिता उपलभ्यन्ते, ब्राह्मणारण्यकोपनिषदस् त्वेकैकं तैत्तिरीयायाः शाखाया, मैत्रायणं ब्राह्मणं सोपनिषत्कं मैत्रायणीशाखायाः, कठोपनिषत् कठशाखायाः श्वेताश्वतरोपनिषच् च श्वेताश्वतरशाखायाः प्रचलन्तीदानीम् सहस्रवर्त्म–सामवेदान्तर्गता कौथुम–संहिता सामवेदत्वेन प्रसिद्धा छान्दोग्योपिनिषन् – नवब्राह्मणयुता राणायनीयसंहिता च त्रिब्राह्मणैकोपनिषद्युता साम्प्रतं प्रचरति। अथर्ववेदान्तर्गताऽथर्ववेदत्वेन प्रसिद्धा गोपथब्राह्मणयुतोपनिषद्युता शौनकसंहिता चापूर्णा पैप्पलादसंहिता सोपनिषत्का च प्रचलिता।

अस्तु, इदानीं वेदसंज्ञाविचारः।

"मन्त्रब्राह्मणयोर् वेदनामधेयम् " इत्यापस्तम्बपरिभाषासूत्रे (1.33) बौधायनगृह्यसूत्रे (2.6.3) च। ब्राह्मणशब्दसमुच्चितौ आरण्यकमुपनिषच्चापि वेदनामधेयौ। शंकरादिभिस् तथैव गृहीतावपि।

कैश्चिन् मन्त्राणेमेव वेदत्वमाश्रितम् इति तत्सूत्रव्याख्यानावसरे धूर्तस्वामी अतो वेदशाखानां मन्त्रसंहिताभागा एव वेदपदेनाभिधातव्याः। दयानन्दमतेऽप्येवम् । अयं त्वत्र विशेषो यत् तन्मते काश्चिद् चतस्र एव मन्त्रसंहिता वेदाभिधानार्हाः। मंत्रसंहितात्मकोपनिषदस् तु वेद एवेति।

"वेदो विध्यर्थवादमन्त्रात्मा" इति मन्वर्थमुक्तावल्यां (2.6) कुल्लूकः। द्विविधं ब्राह्मणं विधिरर्थवादश् चेति सायणः ऋग्भाष्यभूमिकायाम् । "ब्राह्मणशेषोऽर्थवाद" इति त्वापस्तम्बपरिभाषासूत्रे (35)। सायणस्तूपनिषदपि अज्ञातज्ञापकविधित्वेन गृह्णाति, किं तु मीमांसानये उपनिषदर्थवाद एव।

मेधातिथिमते (2.6) वेदो विध्यर्थवादमन्त्रनामधेयात्मकः।

"विधिर, विधेयस्, तर्कश् च वेदः" इति कात्यायनश्रौतसूत्रे पारस्करगृह्यसूत्रे (2.6.5) च। तत्र विधिर् ब्राह्मणं, विधेयो मन्त्रस् ,तर्कश् च कल्पसूत्रं (भर्तृयज्ञः), मीमांसा (कल्पतरुकारः), न्याय–मीमांसे (विश्वनाथः) वेति। "षडङ्गमप्येके इति पारस्करगृह्यसूत्रे (2.6.6)।तथाच वायुपुराणे (1.5.13)–

"ऋचो, यंजूषि, सामानि, ब्रह्मणोऽङ्गानि च श्रुतिः" इति।

जीवगोस्वामिना तत्तत्सन्दर्भे (अच्युतग्रं.मा., पृ. 29) इतिहासपुराणयोरपि वेदत्वमभिमतम् । छान्दोग्योपनिषदि (7.1.2.4) श्रीमद्भागवते (3.12.39) चेतिहासपुराणयोर् पंचमवेदत्वं धृतमेव।

1– गुणरत्नः तर्करहस्यदीपिका (कलकत्ता, 1905) पृष्ठ 266

आद्येऽथर्ववेदस्य वेदत्वं नाड्.गीकृतम् त्रय्यामनन्तर्भावात् । वस्तुतस् तु बृहदारण्यकच्छान्दोग्योपनिषदोरपि "आथर्वणस्य अथर्वाडि.गरसो वा ऋग्यजुःसामवेदेभ्यः पृथगभिधानं तस्य चतुर्थत्वमितिहासपुराणस्य पंचमवेदत्वसदृशमेव मूलवेदबाह्यत्वं ध्वनयति। तद्यथा– ऋग्वेदो, यजुर्वेदः, सामवेदो,ऽथर्वाडि.रस, इतिहासः, पुराणं... (बृ.उ. 2.4.10); ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं, सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पंचम् वेदानां वेदं...(छां.उ.7.1.2), नाम वा ऋग्वेदो, यजुर्वेदः, सामवेद, आथर्वणाश् चतुर्थ, इतिहास–पुराण पंचमो वेदानां वेदः, (तत्रैव 7.1.4) इति। शतपथब्राह्मणे (12.3.4.9)ऽपि "ऋग्वेदो वै भर्गो यजुर्वेदो महः, सामवेदो यशो, येऽन्ये वेदास् तत् सर्वम् इत्यथर्ववेदस्य 'अन्ये वेदाः' "इति श्रेण्यां परिगणनं प्रतीयते, तत्र अथर्वाणो वेदः (93, 4, 3, 7) अंगिरसो वेदः" (13.4.3.8) इत्यथर्ववेदस्य वेदत्वमङ्गीकृतत्वात् । किं बहुना कोटलीयेऽर्थशास्त्रेऽपि (1.3.1) "सामऋग्र्यजुर्वेदस्य त्रयस् त्रयी। अथर्ववेदेतिहासवेदौ च वेदाः इतिकृत्वा अथर्ववेदस्येतिहासवेदेन्न सार्ध्दं पृथग्वेदत्वाभिधानं तस्य मूलवेदभिन्नत्वं द्योतितम् । वेदोत्पत्तिप्रक्रियानिरूपणं प्राप्यते। प्रत्युत तत्र तद्वेदं शान्तमाथर्वणं घोरमाडि.गरसमिति रूपेण द्वैधीकृत्य वेदपंचकत्वमप्यभिहितं दृश्यते। तद् यथा– तां पंचस्वप्यपश्यद् – ऋचि, यजुषि, साम्नि, शान्तेऽथघोरे ––––(1.2.21)." या वेदे व्यष्टिरासीत् तां पंचस्वपश्यन् नृचि, यजुषि, साम्नि, शान्तेऽथ घोरे–––(1.5.10) इति।

ब्राह्मणेषु (शतपथ 13.4.3.6–14, गोपथ 1.1.10,1.2.21.1.5.10 कल्पसूत्रेषु) (आश्वलायन–श्रौतसूत्रम् 10.7) चेतिहासवेदपुराणवेद–सर्पवेद–पिशाचवेदासुरवेदा उल्लिखिताः सन्ति। क्वचित् क्वचित् महिबुध्न्यसंहिता 12.4.सायणः, अथर्वभाष्यभूमिका) तु तेषामुपवेदत्वेन स्मरणं प्राप्यते।

जयन्तभट्टभणितमिदं यत् द्विविधोवेदः– श्रूयमाणोऽनुमीयमानस् च। श्रूयमाणश् च श्रुतिरित्युच्यते, अनुनीयमानश् च स्मृतिरिति। (न्या.म. 1 पृ.240)

ईश्वरसंहितानुसारेणेकायनवेदो मूलवेदः प्रसिद्धो वेदचतुष्टयस् तु विकारवेदाः ईश्वरसंहिता (1.18–24)।

सामवेदस्य पंचसप्ततिमन्त्रान् मुक्त्वा सर्वे सामवेदीया मन्त्रा ऋग्वेदात् परिगृहीताः सन्ति। तैरपि कस्याश्चिल्लुप्तग्वेंदशाखाया भाव्यम् । प्रचलितयोर् यजुर्वेदाथर्ववेदसंहितयोरपि पर्याप्ताशं प्रचलिताया ऋग्वेदसंहिताया माधमर्ण्यं वरीवर्ति।

प्रवृत्ति–निवृत्ति–विधि–तच्छेष–व्यतिरेकेण केवलवस्तुवादी वेदभागो नास्ति (शारी.भा 1.1.4) इति बदता शङ्.करेणारण्यकोपनिषदोर् वेदभागत्वे मीमांसकानां शंका प्रकटीकृता। कुमारिलोऽपि – यथैव प्रमाणानां शब्दस् , तत्रापि च वेदः प्रमाणं, तथैव वेदेऽपि विधिमात्रं युक्तत कल्प्यते। (तं.वा.1.2.4.6. पृ.9) वस्तुतस् तु प्रायश उपनिषदादीनामर्थवादपरत्वेन गौणं वेदत्वमिति मीमांसकसमयः इत्याभाति।

काश्चितदतीव विचित्राः शाखा स्मर्यन्ते। पुरा काचित् सांख्यश्रुत्यात्मिका कापिलशाखा आसीत् डा. रघुवीरेण चर्चिता। अत्रेदं बोध्यं यद् ऋग्वेदे शैशिरीयशाकलसंहितायां (10.27.16) कपिल ऋषित्वेन गृहीतो दृश्यते ऋषयश् च मन्त्रद्रष्टारः। महाभारतादावपि साङ्.ख्यश्रुतिः काचिदुपलक्षिता। किंच काचित् तुरुष्कशाखा अप्यासीद् यजुर्वेदीया इति प्रपंचहृदयादवगम्यते (पृ.19) के ते तुरूष्का येषां शाखाऽत्र विवक्षिता? तर्कताण्डवे (पृ.255) कस्यचित् तुरूष्कागमस्य नामसंकीर्तनं प्राप्यते। गुणरत्नश् च तर्करहस्यदीपिकाया (पृ.20) तुरूष्काणां सृष्टिविषयं मतं समुदाहरन् भणति– अथवा लोकस्वरुपेऽप्यनेके वादिनोऽनेकधा विप्रवदन्ते। तद् यथा– केचिन् नारीश्वरजं जगन् निगदन्ति; परे सोमाग्नि– सम्भवं.... तुरुष्का गोस्वामिनामैकदिव्यपुरुषप्रभवम् इति। ऐतिहासिकळप्रवरवाशम् मतानुसारेणात्र तुरुष्कशब्देन ख्रीष्टीया आख्यायन्ते न तु मुस्लिमा तथा चात्र दिव्यपुरुषः ख्रीष्टो नत्वल्लाहो मुहम्मदो वेति। अस्मन्मते

त्वेषा क्लिष्टा कल्पना। अत्र गोस्वामिपदेन मुस्लिमानां रसूल इत्युपाख्या धर्मप्रवर्तका धर्मसंस्कर्तारो वा विवक्षिता-प्रतीयन्ते। दिव्यपुरुष पदेन च ज्योतिर्मयो मुहम्मद इति वक्तुं शक्यते सूफीनये मुहम्मद आदिज्योतिः (न ूर) परमेश्वरस्य, मुहम्मदायेव तज्ज्योतिष्प्रभवा वा सर्वा सृष्टिरियम् । अतस् तुरूष्कशब्देन किल मुस्लिमोऽभिप्रेतः प्रतीयते गुणरत्नकृतौ। किं च इस्लामस्योदयात् प्रागपि कनिष्कादयस् तुरूष्कत्वेन स्मर्यन्ते आर्यमंजूश्रीमूलकल्पादौ। अतः केषां तुरूष्काणां शाखा चर्चिता प्रपंचहृदये इति वक्तुं न शक्यतेऽद्यसम्यक् । अकबरे युगे प्रणीता संस्कृतार्व्यसमन्विता ऽल्लोपनिषन्नाम्न्युपनिषदत्र बलाद् विचारपथे आयाति।

अपरं च। अष्टमशतकीयो बौद्धदार्शनिकः शान्तरक्षित स्वकीये तत्वसंग्रहे (3510-3513) सूचयति यत् पुरा काचिद् ब्राह्मणैरधीयमाना बुद्धप्रशंसिनी निमित्तशाखाऽप्यासीत् तद् यथा-

किं तु वेदप्रमाणत्वं यदि युष्माभिरिष्यते,
तत् किं भगवतो मूढैः सर्वज्ञत्वं न गम्यते ।।
निमित्तनाम्नि सर्वज्ञो भगवान् मुनिसत्तम :
शाखान्तरे हि विस्पष्टं पठ्यते ब्राह्मणैर् बुधैः।।
योऽसो षड्दन्तमात्मानमवदातद्विपात्मकम्
स्वप्ने प्रदर्श्य स जातो बोधिसत्त्वो गुणोदधिः।।
विधुष्टशब्दः सर्वज्ञः कृपात्मा स भविष्यति।
प्राप्तामृतपदः शुद्धः सर्वलोकपितेति च ।।

निमित्तशाखाया शाखात्वं दर्शयन् नाह तथैव (3514-अ 5)-

अथ शाखान्तरं नेदं वेदान्तर्गतमिष्यते,
तदत्र न निमित्तं वो द्वेषं मुक्त्वाऽवधार्यते।
स्वरादयश् च ते धर्माः प्रसिद्धाः श्रुतिभाविनः
कर्तुं मत्रापि शक्यास् ते नरेच्छामात्र सम्भवात् ।।

रत्नकीर्तिना ऽप्युच्यते- प्रत्युत निमित्तनाम्नि शाखान्तरे स्फुटतरमेव सर्वज्ञः प्रतिपादितः इति रत्नकीर्तिनिबन्धावल्याम् (पृ.25)। पुनरपि बुद्धकालीनानां केषांचिच् श्रमणानामपि कश्चिद् वेद आसीदिति सुत्तनिपातात् (329) अवगम्यते-वेदानि विचेय्य केवलानि समणानं यानि प अत्थिब्राह्मणानां इति।

अपूर्वः कश्चिद् विचारःसहसा प्रादुर्भवत्यत्र। भागवतादिपुराणेषु शांकरे दशावतारस्तोत्रेऽपि च बुद्धो भगवदवतारेषु परिगणितः शंकरेण त्वसो बहुशः स्तुतोऽपि दृश्यते। तत्स्तोत्रस्य नवमं पद्यदिम् -

धराबद्धपद्मासनस्थाङि.घ्रयष्टिर् नियम्यानिलं न्यस्तनासाग्रदृष्टिः
य आस्ते कलो योगिनां चक्रवर्ती स बुद्धः प्रबुद्धोऽस्तु मच्चित्तवर्ती।।

बुद्धस्यैतादृशमाहात्म्यस्य मूलं प्रणष्टा निमित्तशाखैव प्रतिभाति। अत्रेदमपि बोध्यं यत् स्कन्दपुराणान्तर्गतायां सूतसंहितायां यज्ञवैभवखण्डे (20.16) बुद्धागमस्य वेदमूलत्वं स्पष्टमेवोररीकृतमुपलभ्यते। तद् यथा-

समूलेषु च धर्मेषु बुद्धागम समन्वितः
धर्मः श्रेष्ठ इति प्रोक्तो मया वेदार्थपारगाः।।

बुद्धप्रोक्ता आगमा बुद्धागमाः इति सायण तत्र।

वस्तुतस् तु बुद्धो वैदिकलोकव्यवस्थायां वर्णाश्रमव्यवस्थायां श्रद्धालुवरगम्यते। सुत्तपिटके बहुषु सुत्तेषु संकलितेषु बुद्धवचनेषु वर्णव्यवस्थाया आर्षपरम्परानुसारिसमुज्ज्वलरूपस्य माहात्म्यं कण्ठतः स्वीकृतं गम्यते। बुद्धेनेतस्ततः प्रत्नर्षीणां प्रशंसाऽपि भूरिशः कृता। तद्देशनासु श्रमणानां ब्राह्मणानां च तुल्यमादराहर्त्वमपि ध्वन्यते बोधिसत्त्वाः क्षत्रिय–ब्राह्मण–कुलयोरेव जायन्त इति बुद्धवचनं ललितविस्तरे (अ.3) इति निमित्तशाखा प्रसंगात् सर्वमपि युज्यते, सर्वमपि हृदयंगमं भवति।

कांश्चिदभिनवान् वेदमत्रान् साम्प्रतं स्वर्गतः कश्चिद् ब्रह्मर्षिर दैवरातोऽपश्यदिति तस्य गुरूरेव वासिष्ठ गणपतिमुनिरात्मानं तन्मन्त्राणामाविर्भावस्य प्रत्यक्षसाक्षिणं मन्यमानः। ते मन्त्राश् छन्दोदर्शनमिति कृत्वा संगृहीता वासिष्ठ–गणपति–मुनि–प्रणीतेन वासिष्ठान्वयभाष्येण सार्द्धं मुम्बईस्थेन भारतीय विद्याभवनेन 1968 ख्रीष्टाब्दे प्रकाशनं नीताश् च।

महाभारते शान्तिपर्वणि द्वाविंशत्यधिकशततमे (122) अध्याय कुम्भकोणसंस्करणे वेदस्यानन्तत्वं सर्वेषामपि शास्त्राणां धर्मग्रन्थानां च वेदत्वं विस्तरेण प्रपंचितं दृश्यते। तत्र ऋग्वेदादालौकायतिकागमं सर्वोऽपि शास्त्रविस्तारः वेद एव तु सर्वशः घोषितमस्ति।

इदानीं सायणकृतं वेदलक्षणम् –

प्रत्यक्षेणानुमित्या वा यस् तूपायो न विद्यते
एवं वदन्ति वेदेन तस्माद् वेदस्य वेदता।।

सामान्यवेददृष्ट्यनुसारतोऽध्ययनक्रमोच्चारणापाठमन्त्रसंख्यानुष्ठानपद्धत्यादिभेदभिन्नर्ग्यजुःसामाथर्वात् – मकचतुष्कोटिप्रविभक्तत्रिंशाधिकैकादशशतशाखात्मकम् तत्तद्ग्रन्थनिर्दिष्टैर् ऋषिभिस् तत्तत्कालेषूपज्ञातो, दृष्टः, प्रकाशितो वा, पश्चाद् व्यासादिभिः संगृह्य सम्पादितश् च स्तुतिनिन्दापरकृतिपुराकल्पात्मकार्थवादपरो विधिनिषेधपरश् च मन्त्रब्राह्मणात्को वेद इति वेदस्य स्वरुपलक्षणम् । वेदलक्षणम – स्वतः परतो वा सिद्धत्व–प्रमाणत्वयोः सतोरनादिमहाजनपरम्परापरिगृहीत–वाक्यत्वं वेदत्वम् । इति व्याख्यासापेक्षमिदं लक्षणं महाजनपरिगृहीतपरम्परानुसारि।

वेदमन्त्रप्रादुर्भावकथाऽतिविस्तरा सामंजस्यमनादृत्य वर्तमाना। तद् यथा–साक्शत् कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्यो साक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्सम्प्रापुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर् वेदं च वेदाङ्गानि च। (बिल्यं भिल्यं भासनमिति वा)।" (निरुक्तम् 1.1.6 अपि च– ऋषिद्र् दर्शनात् स्तोमान् ददर्शेत्यौपमन्यवः। तद् वेदनाँस् तपस्यमानान् ब्रह्म स्वयम्भवभ्यानर्षत् त ऋषयोऽभवंस् तदृषीणां ऋषित्व (तै.आ 2.9 पृ. 168) इति विज्ञायते।") निरूक्तम् 1.2.3) पुराणानुसोण (वायु पु. 1.59.60.6) तु –

असन्तोषाद् भयाद् दुःखान् , मोहाच् , छोकाच् च पंचधा
मन्त्राः प्रादुर्वभूवादो पूर्व मन्वन्तरेण ह ।।

वृहद्देवतायामपि (1.34.40)–

मन्त्रा नानाप्रकाराः स्युर् दृष्टा ये मन्त्रदर्शिभिः
स्तुत्या चैव, विभूत्या च प्राभावाद् देवतात्मनः ।।
स्तुतिः, प्रशंसा, निन्दा च, संशयः परिदेवना,
स्पृहाशीः, कत्थना, यान्चा, प्रश्नः प्रैषः प्रवल्हिका,
नियोगश् चानुयोगश् च श्लाघा, विलपितं च यत् ,
आचिख्यासाऽथ संलापः, पवित्राख्यानमेव च,
आहनस्या, नमस्कारः प्रतिराधस् तथैव च
सङ्.कल्पश् च प्रलापश् च प्रतिवाक्यं तथैव च,
प्रतिबोधोपदेशो च प्रमादापह्नवो च ह,
उपप्रेषश् च यः प्रोक्तः, सन्जरो यश् च विस्मयः
आक्रोशोऽभिष्टश् चैव क्षेपः शापस् तथैव च,
उपसर्गो निपातश् च नाम चाख्यातमित्यपि,
ूतं भव्यं भविष्यं च पुमान् स्त्री च नर्पुसकम् –
एवं प्रकृतयो मन्त्राः सर्ववेदेषु सर्वशः ।

निरूक्तादवगम्यते यद् विश्वामित्रो नदीस् तुष्टाव– "गाधाभवत" इति। (1.2.7) तन्मन्त्र ऋग्वेदे (3.33.5) वर्तते। ऋग्वेदे (1.179.4) ऋषिपुत्र्या विलपितां वेदयन्ते इति निरूक्तवचनम् (1.51) (निरूक्तवचनादेव 1.4.1.6) त्रितं कूपेऽवहितमेतत्सूक्तं प्रतिषभौ–

सं. मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
मूषो न शिश्ना व्यदन्ति माऽऽध्यः स्तोतारं ते शतक्रतो?
वित्तं मे अस्य रोदसी।। (ऋ.1.105.8)

बृहद्देवतायां (5.50–81) श्यावाश्व–कथा श्यावाश्वः काश्चिद् राजर्षिकन्यां प्रेप्सया मन्त्रदृड्. मन्त्रकृद् वाऽभवत् –

श्यावाश्वस्य मनस्यासीन् मन्त्रस्यादर्शनादहम्
न लब्धवानहं कन्यां हन्त? सर्वाङ्.गशोभनाम् ।
अप्यहं मन्त्रदर्शी स्यां भवेद् धर्षो महान् मम।

इत्यरण्ये चिन्तयतः प्रादुरासीन मरूद्गणः। (तत्रैव 5.65.67 अन्ततोगत्वा स ऋ. 5.61– स्थान् दश मन्त्रानपश्यत् तां कन्यां चालभत् । इदमपि बोध्यं यच् चतुर्णामपि वेदानां तच्छाखानां वा माहात्म्यासाम्यं कैश्चिन् नाङ्.गीक्रियते। क्वचित् सामवेदमाहात्म्यपराण्यपि क्वचिच् च तद्विगानपरागयपि वचनान्युपलभ्यन्ते। तद् यथा– छान्दोग्योपनिषदनुसारेण (1.1.2) ऋचः साम. रसः इति। गीतावास्यं (19.22) च वेदानां सामवेदोऽस्मि इति। मनुस् (4.123–124) तु सामवेदस्याशुचित्वं दर्शयन् नाह–

सामध्वनावृग्यजुषी नाधीयीत कदाचन।

वेदस्याधीत्य वाऽप्यन्तमारण्यकमधीत्य च ।।

ऋग्वेदो देवदैवत्यो, यजुर्वेदस् तु मानुषः,

सामवेदः स्मृः पित्र्यस् , तस्मात् तस्याशुचिर् ध्वनि।।

तथा च विष्णुपुराणे 2.11.13)–

सर्गादौ ऋड्.मयो ब्रह्मा स्थितौ विष्णुर् यजुर्मयः,

रूद्रः साममयोऽन्ताय तस्मात् तस्याशुचिर ध्वनिः।।

अपि च– ऋग्वेदे वसिष्ठद्वेषिण्योऽभिशापरूपाश् चतस्र ऋचो 3.53.21–24) याभिर् विश्वामित्रो वसिष्ठपश्चत् । तत्र शोनकः बृहद्देवतायां (14.117.120)–

पराश् चतस्रो यास् त्वत्र वसिष्ठद्वेषिण्यः स्मृताः।

विश्वामित्रेण ता प्रोक्ता अभिशापा इति स्मृताः।

द्विषद्द्वेषास् तु ताः प्रोक्ता विद्याश् चैवाभिचारिकाः

वसिष्ठास् तान् न श्रुण्वन्ति तदाचार्यकसम्मतम् ।

कीर्तनाच् छवणाच्चाऽपि महादोषश् च जायते।

शतधा भिद्यते मूर्धाकीर्तितेन श्रुतेन वा।

तेषां बालाः प्रमीयन्ते तस्मात् तास्तुन कीर्तयेत् ।

निरूक्तवृत्ति – कृद दुर्गाचार्यः कापिष्ठलो वासिष्ठ आतीत्, अतः स उपर्युल्लिखितानां कांचिद् ऋचं न निरब्रवीत् । विलिखिति सः–

"यस्मिन् निगमे एष शब्दो (लोधम्) सा वसिष्ठद्वेषिणी ऋक् । अहं च कापिष्ठलो वासिष्ठः अतः तां न निर्ब्रवीमि। निरूक्तवृत्तिः 4.14, खण्ड। पृ. 323) इति

वेदापौरूषेयत्वविमर्शः

डा० पारसनाथ द्विवेदी

अपोरूषेयवाक्यं वेदः। तच्च मन्त्र ब्राह्मणात्मकम्। ज्ञानाख्यानप्राप्त्याद्यर्थक विद् –

धातो करणेऽधिकरणे का हलश्च (पा०सू० 3–3–12) इति सूत्रेण घञि प्रत्यये वेदशब्दनिष्पत्तिः। धर्मादीनां ज्ञानाख्यानप्राप्तिसाधनं वेदः। वेदनं वा वेदो भावसाधनोऽभ्युदयनिःश्रेयस साधनज्ञानरूपः, तत् प्रतिपादकत्वाद् ऋगादिषु वेदशब्दव्यपदेशः।

वेदः सर्वपुरूषार्थसाधको धर्ममूलमभ्युदय निःश्रेयसहेतुः। उत्तंच भगवतपादैः श्री शङ्कराचार्यैः शास्त्रयोनित्वात् (1–1–3) इति सूत्रे

"महत ऋग्वेदादेः शास्त्रस्यानेक विद्यास्था नोपवृंहितस्य प्रदीपवत् सर्वार्थकद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म।।

तत्रैव भामतीकाराः श्रीवाचस्पति मिश्राः प्राहुः"

चातुर्वर्ण्यस्य चातुराश्रमस्य च यथायर्थ निषेकादिश्म शानान्तासु ब्राह्ममुहूर्तोप्रक्रमप्रदोष परिसमापनीयासु नित्यनैमित्तिककाम्यकर्मपद्धतिषु च ब्रह्मत्वे च शिष्याणां शासनाच्छास्त्रमृंग्वेदादि। अत एव महाविषयत्वात् महत" सर्वविद्यास्थानो वृंहितो वेदः। पुराणमीमांसान्यायधर्मशास्त्राणि शिक्षाकल्पव्याकरणनिरूक्तज्योतिषच्छन्दांसि षडङ्गानि एवं दशविद्यास्थानानि तैरूपकृतो महाविषयो वेदः इत्यतिरोहितम्।

मनुनाप्युक्तम् –

वेदोऽखिलोधर्ममूलं स्मृतिशीलेचतद्विदाम् आचारश्चैव साधूनां स्वस्थ च प्रियमात्मनः। (मनु०– द्वितीयाध्याये)

स्मृतिशीलादीनां वेदमूलकत्वादेव धर्मे प्रामाण्यं न स्वतन्त्रमिति बोध्यम्। एवंच धर्मप्रतिप्रादकत्वं वेदस्य निर्विवादम्। धर्मश्च यागादिः। अभ्युदयनिश्रेयससिद्धिसाधनं वा धर्मः। अभ्युदयः स्वर्गादिः निःश्रेयस मोक्षः।

मन्त्रब्राह्मणात्मको वेदः पंचविधः, विधिमन्त्रनामधेयः निषेधार्थ वादभेदात्। विध्यादीनां स्वरुपं मीमांसाशास्त्रे व्याख्यातम् विस्तरभयात् नेहोपन्यस्ते। स चायं वेदः षडङ्ग सर्वजनानुग्राहकोऽनेकशास्त्रभेदभिन्नः सवर्ज्ञकल्पोऽनादिः पुराणादिसकलविद्याप्रतिष्ठानभूतः प्रदीपवत् सर्वार्थावद्योतकोऽद्यापि स्वरशो वर्णशः पदशः समनुक्रान्तः गुरूपम्परयानुगृहीतः प्रभाशते। स चैकोऽपि ऋग्यजुरित्यादि चतुर्भेदभिन्नोऽनेक वर्त्मा प्रतिभाति। उत्तंच

वाक्य पदीये–

प्राप्त्युपायोऽनुकारश्च तस्य वेदा महर्षिभिः। एकोऽप्यनेक वर्त्मेव समाम्नातः पृथक्–पृथक् ।।

मन्त्र ब्राह्मणयोर्वेदाख्येत्युक्तम् । मन्त्रैरेव स्मर्तव्यमिति नियमात् यागादिप्रयोग समवेतार्थ स्मारकत्वं मन्त्रत्वम् । तेषां प्रयोगसमवेतार्थ स्मारकत्वं मन्त्रत्वम् । तेषां प्रयोगसमवेतार्थ स्मारकत्वनैवार्थवत्त न तु अदृष्टफल्कत्वे न सम्भवति दृष्टफलकत्वेदृष्टफलकत्वकल्पनाया अन्याय्यत्वात् । उक्तंच आचार्येण जैमिनिना – "तच्चेदकेषु मन्त्राख्या" (जै.सू. 2/1/32) तत् कर्म समवेतार्थ स्मरणं चोदकं फलं येषां तेषु मन्त्राख्या मन्त्र नामेत्यर्थः। अथवा यस्मिन् वेदवाक्येऽभियुक्तानां मन्त्र इति प्रसिद्धि स मन्त्रः। अतः एव अदृष्टार्थ जपादि मन्त्रेष्वपि लक्षणसंगतिः।

मन्त्रातिरिक्तवेदभागो ब्राह्मणशब्देनाभिधीयते। उक्तंच जैमिनिना "शेष ब्राह्मण शब्द" इति। तत्र मन्त्रभिन्नत्वे सति वेदत्वं ब्राह्मणलक्षणम् । वेदत्वे सतीति विशेषणात् कल्पसूत्रेषु नाति व्याप्तिः अयं मन्त्रब्राह्मणविभागः कण्ठरवेण पठितेषु आम्नातेष्वेव अत ऊह बाक्ये न मन्त्रत्वम् । अन्य पदस्थानेऽन्यपदप्रक्षेप ऊहो यथा अग्नये त्वा जुष्टं निर्वपामीत्यत्र सूर्यायत्वा जुष्टं निर्वपामीत्यूहस्तत्र न मन्त्रत्वम् तथैव नामगोत्रप्रवरादीनां यदुच्चारणं क्रियते तत्रापि नमन्त्रत्वम् ।

चत्वारो वेदा ऋग्यजुःसामाथर्वलक्षणाः। तेषां मन्त्राणां मध्ये यत्रार्थ वशेन पादव्ययस्था सन ऋक् । उक्तंच जैमिनिना–

तेषामृग यत्रार्थ वशेन पदाव्यवस्था (जै0 सू0 2–1–35)

गीतिषु सामाख्या (जै0 सू0 2–1–36) तत्रैव मन्त्रेषु गीतिविशिष्टा मन्त्राः सामशब्देन व्यपदिश्यन्ते।

शेषे यजुः (2–1–37) ऋक्सामभिन्ने मन्त्रे वाचकतया यजुः शब्दोऽवस्थति इति। सन्ति निगदाख्या मन्त्रा उच्चैः क्रियमाणोः पर सम्बोधनार्थाः अग्नीदग्नीन् विहरेत्यादयः, तेषामपि यजुःष्वेवान्तर्भावः। एवं निगदानिगदभेदेन यजूंषि द्विविधानि अग्निगदानांमुपांशूच्चारणम् गिदानांच उच्चेरुच्चारणम् । नहि उपांशूच्चारणे परो ज्ञास्यति, पर सम्बोधनार्थ त्वंच निगदानामिति। एवं मन्त्राभिप्रायेण वेदानां त्रित्वम् । चतुष्ट्वं तु याज्ञिक कर्मभेदेनमन्त्रभेदमाश्रित्य बोध्यम् । तथा च ब्राह्मणम् "ऋग्विदमेव होतारं वृणीष्व यजुर्विदमध्वर्युम् , सामविदमुदगातारम् , अनेक ज्ञायते यद् उदगातृकर्मोपकारि मन्त्रसमूहः साम, ब्रहमकर्मोपकारि मन्त्र समूहोऽथर्वेति। अथर्वाख्येन ब्रह्मणा दृष्टवात् तन्नामाऽयथर्ववेदः। एवं चतुर्था वेदो विभक्त एकेऽपि। एवं शाखाभेदेनाऽपि भिन्नो वेदः। उक्तंचैतत् महाभाष्यकारेण पतंजलिना शब्दप्रयोगविषयविभुत्वं प्रदर्शयताचत्वारोवेदाः साङ्गाः सरहस्या बहुधा भिन्नाः, एकशतमध्वर्यु शाखाः सहस्त्रवर्त्मा सामवेदः, एकविंशतिधा वाह्वृच्यं, नवधाथर्वणो वेदः।

तत्र अङ्गानि शिक्षादीनि, रहस्यमुपनिषत मन्वादिस्मृतयो वा। एवं भिन्नो वेदो विशिष्टानुपूर्वीकमपौरुषेयं वाक्यम् । सर्वपुरुषाभ्यां णढन्क्रौ (पा० सू० 5–1–10) इति सूत्रेण पुरुषेण कृतमित्यर्थे ढन् प्रत्यये पौरुषेय शब्दः। न पौरुषयः, अपौरुषेयः। वेदाश्च न केनिचत् पुरुषेण कृता इति ते अपौरुषेयाः। अपौरूषेयत्वाच्च सकल "पुरुषगत दोषरहितत्वात् अनधिगताबाधितनिःसंशयार्थविषयकविज्ञानजनकत्वाच्च तेषां प्रामाण्यं सर्वप्रमाणेषु मूर्धाभिषिक्तमस्ति। तत्र नैयायिकादयो वेदानामीश्वरप्रणीतत्वात् पौरुषेयत्वं मन्यन्ते। न पुरुषं विना स्वयं वाक्यात्मकः शब्दग्रामः क्वचन प्रवर्तितो दृष्टः।

श्रुतियुक्तिभ्यांच ते वेदस्य पौरुषेयत्वं साध्यन्ति।

श्रुतयस्तावत् --- "तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे, तस्माद्

यजुस्तस्मादजायत" (ऋग् 8-4-18)

"त्रयो वेदा अजायन्त, ऋग्, वेद एवाग्नेर जायत यजुर्वेदो वायोः सामवेद आदित्यात्। "इदं सर्वमसृजत् ऋचो यंजूषि सामानि"

इत्याद्याः पौरुषेथत्वं वेदस्य प्रतिपादयन्ति अनुमानमपि–वेदाः पौरुषेया वाक्यत्वात् कालिदासादिवाक्यवत् वेदा आप्तप्रणीताः प्रमाणत्वे सति वाक्यत्वात् मन्वादिवाक्यवत्। एतच्च वेदपौरुषयेत्वसाधकम्। आप्तो नाम यथार्थवक्ता रागादिवशादपि नान्यथा वादी। सकलपुरुषगतदोषरहितो वा आप्तः स चेश्वरस्ततप्रणीतत्वं वेदानाम्।

न च वेदा अपौरुषेयाः सम्प्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वाद् आत्मवद् इत्युक्तानुमानप्रतिपक्षानुमानमपौरुषेयत्वं साधकमस्तीतिवाच्यम् हेतुविशेषणसिद्धेः। तथाहि, वेदपौरुषेयत्ववादिभिः– प्रलये वेद सम्प्रदायस्य विच्छेदस्वीकारात्। अस्मर्यमाणं कर्तृकत्वं किं अप्रमीयमाणकर्तृकत्वमुनस्मृत्य विषयकर्तृकत्वम् नाद्यः वेदानां कर्तुः पूर्वो श्रुतिभ्यः प्रमीयमाणत्वात्। न द्वितीयः ताभ्य एवं श्रुतिभ्य स्मर्यमाणत्वात्। विकल्पा सहत्वाच्च। तथाहि किमेकेन कर्तुरस्मरणमुत सर्वैः। आद्ये विप्रकीर्णश्लोकेषु केनचित् अस्मर्यमाणं कर्तृकेषु पौरुषेयेषु अपौरुषेयत्वापत्तिः। द्वितीये तु सर्वैरस्मरणस्य असर्वज्ञैरस्मदादिभिर्ज्ञातुमशक्यत्वात् वेदस्यापि अपौरुषेयत्वं न सिध्येत्।

न चोक्तपोरुषेयत्वसाधकानुमानमप्रयोजकं विपक्षे बाधकतर्काभावादिति वाच्यम् वेदनानामपौरुषयेत्वे आप्तप्रणीतत्वे वा बालोन्मत्तादिवाक्यवदप्रामाण्यप्रसङ्गस्यैव विपक्षवाचकतर्कस्य सत्वात्। न च बालोन्मत्तकाम्यानामनाप्तप्रणीतत्वादेव प्रामाण्यमिति वेदानां तु अनाप्तप्रणीतत्वादेव प्रमाण्यमिति वाच्यम्, अनाप्ताप्रणीतवामास्थ आप्तप्रणीत्वनियमात्। अन्यथा वक्तुरभावे वाक्यस्योत्पत्तिं प्रति प्रत्योरभावप्रसङ्गःस्यात्। न चाभिव्यक्तिरेव शब्दानां नित्यानां नोत्पत्तिरिति वाच्यम्। तथा सति पाषण्डवंचकादि वाक्यानामति प्रामाण्य प्रसङ्गःस्यात्।

किंच शब्दानामानित्यत्वादपि वेदानां पौरुषेयत्वं सिद्धम्। प्रत्यक्षमेव वर्णानामुत्पन्नप्रध्वंसित्वमुपलभ्यते। एवं तादृशवर्णसमुदायस्य पूर्वपूर्ववर्णानुभवजन्यसंस्कार विशिष्टान्त्यवर्णरुपस्य पदस्य वाक्यस्य वा स्फुटमेवानित्यत्वम् अनुमानमपि शब्दानित्यत्वे तथाहि शब्दोऽनित्यः कृतको का सामान्यवत्वे सत्यस्मदादि वाह्येन्द्रियप्रत्यक्षत्वात्, घटवदिति। शब्दानित्यत्वमिदं विस्तरेण न्यायवैशेषिकदर्शने "आदिमत्वादैन्द्रियमत्वात् कृतकवदुपचाराच्य (न्या० सू० नू० 2-2-13) इत्यादि गौतमसूत्रेषु तद्भाष्ये च प्रतिपादितम्। सिद्धे च शब्दानित्यत्वे प्रथमक्षणे वर्ण उत्पद्यते क्षितीयक्षणौ तिष्ठति, तस्मिन् क्षणे एक द्वितीयो वर्ण उत्पद्यते तृतीयक्षणे पूर्ववर्णो नश्यति द्वितीयवर्णश्च तिष्ठत्येवं क्रमेण वर्णाः उच्चरित प्रध्वंसिनः सन्ति। एवं क्रमेण उत्पन्ना नष्टाश्च शब्दा न नित्या नापौरुषेया भवितुमर्हन्ति। तेषां वेदानां कर्ता सर्वज्ञः सर्वशक्ति सर्वप्रपंच सृष्टिस्थितिसंहारकर्तापरमेश्वरो नित्यज्ञानेच्छा कृतिमान् नान्यः। न ह्यन्यः कश्चित् सर्वार्थ प्रकाशकस्य सर्वज्ञकल्पस्य सर्वधर्ममूलभूतस्य वेदस्य परमेश्वराद् ऋते कर्ता सम्भवति। अव्याहतविज्ञानपरमेश्वरः प्रह्नयेऽपि वेदान् जानाति सर्गकाले च ब्रह्मादीनुपदिशति। न चेश्वरस्य शरीराभवत् कण्ठताल्वादि व्यापाराभावात् कथं वर्णानामुत्पत्तिरिति वाच्यम्। स्वभावतो शरीरस्यापि परमेश्वरस्यसर्वसमर्थस्यानन्तविज्ञानशक्तेर्भक्तानुग्रहार्थलीलाविग्रहग्रहणोपपत्तेः। न चेश्वरस्य वेद प्रणयने श्रमः, अनायासेनैव वेदानांविरचनात्। तथा च श्रुतिः अस्य महतो भूतस्य निःश्वसितमेतत् ऋग्वेदो यजुर्वेद" इत्यादि रुपा। परमेश्वरात् निःश्वासवत् अनयासेन वेदा प्रवृत्ता इति भावः। एवं च वेदानां पौरूषेयत्वं सिद्धं भवति। सिद्धे च पौरुषेयत्वे

यानि वेदवाक्यानि वेदानां नित्यत्वं पौरुषेयत्वं वा प्रतिपादयन्तीव दृश्यन्ते तेषामन्यपरत्वमाश्रयणीयम् । तथाहि –

"वाचा विरुपनित्यया (तै० सं० 2–6–11)" "यो ब्रह्माणं विदधाति पूर्वं यो वै भेदांश्च प्रहिणोति तस्मै" (श्वे० 6118)

"नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम्" (कठोपनिषत्) "अनादि निधना नित्या वागुत्सृष्टा स्वयं भुवा" इत्यादि श्रुति स्मृतिभ्यो वेदस्य नित्यत्वं प्रतिपादितम् । नित्यत्वे सति वेदानां पौरुषेत्वं न युज्यते। अतस्तासां श्रुतीनां स्मृतीनांच अन्यार्थ परत्वं वक्तव्यम् ।

वाचा विरुपनित्ययेत्यस्य काम्यस्य " वृष्णे चोदयस्व सुष्टितिम् " इत्यस्य काम्यस्य शेषत्वात् अग्निस्तुति–विधि परत्वमाश्रयणीयम् । यो वै ब्रह्माणमित्यादि वाक्यस्य तु वेदपौरुषेयत्वपक्षेऽपि योजयितुं शक्य त्वात् नापौरुषेयत्वे प्रामाण्यम् । मृत्युप्रोक्तं सनातनमित्यस्य च यमाख्यानप्रशंसा परत्वं न स्वार्थे तात्पर्यमेवमन्यत्रापि ऊह्यम् । अनादिनिधनेत्यादीनां स्मृतीनांच प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते" इत्यादि स्मृतिविरोधात् न प्रामाण्यम् तस्मादुक्तानुमानेनं श्रुतिप्रमाणेन च वेदानां पौरुषेयत्वं सिद्धम् ।

वेदापौरुषयेत्ववादिनस्तु पूर्वोक्तपरिहरन्तः प्राहुः--------

वेदानां यत् पौरुषेयत्वं साध्यते तत् किं पुरुषाद्युत्पत्तिमत्वमुत प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वम् । तत्र प्रथमः पक्षोऽस्माभिः स्वीक्रियत एव। क्रमविशेषवान् शब्दराशिर्हि वेदः क्रमश्चानुपूर्वी कालतो देशतो वा नियतः। सचोभय विधोऽप्यत्र न सम्भवति शब्दस्य नित्यत्वात् विभुत्वाच्च। न हि नित्यानां विभूनां शब्दानां देशकालकृतः क्रमः सम्भवति। प्रतीयते चात्र वेदे शब्दराशिरुपे क्रमः। तस्मात् नित्यस्य शब्दात्मकस्य वेदस्य वस्तुतो देशकालकृतक्रमरहितस्यापि उच्चारणप्रतिपत्तयोरन्तरक्रममादाय क्रमवत्वं बोध्यम् । उच्चारणा प्रतिपत्ति अनित्ये।

एवंच वेदानामुच्चारणं तत् प्रतिपतिश्चैतदुभयमनित्यं पुरुषाधीनोत्पत्तिकम् तदेतत् पौरुषयेमभीष्टमेव। साम्प्रतमपि वेदानामुच्चारण तज्ज्ञानंच पुरुषाधीनं दृश्यते।

प्रमाणान्तरेणार्थमुपलभ्य विरिचतत्वं तु नाङ्.गीक्रियते प्रमाणाभावत् । यानि च श्रुतिस्मृतियुक्ति–रूपाणि वेदपौरुषेयत्ववादिभिः प्रमाणानि उपन्यस्तानि तानि सर्वाणि वेदानां क्रमविशिष्टशब्दरुपाणामुच्चारप्रतिपत्योः पुरुषाधीनात्मलाभमादाय गतार्थानि। अथ वा वेदसम्प्रदायविद्बोधकानि अधिष्ठातृदेवता बोधकानि वा स्युः। यथा विराजः पुरुषत् "तस्माद् यज्ञात् सर्वहुत ऋच इत्यादि वाक्येन श्रूयमाणा ऋगादीनामुत्पत्तिः प्रादुर्भाव एव। अथवा अव्याहतस्मृतेस्तस्मात् पुरुषात् परमेश्वरात् यथापूर्वकल्पं वेदाः स्मृता तदुच्चारणेन वा प्रकाशतांनीता इत्यर्थः। तथैव "ऋग्वेद एवाग्नेरजायत" इत्यादीनां श्रुतीनांच ऋगाद्यधिष्ठातृदेवता प्रकाशनपरत्वं न तु अग्न्यादेः वेदकर्तृत्वबोधनपरत्वं युक्तमन्यथा परेश्वर कर्तृकत्वमपि तेषां न सिध्येत् । एवमन्यत्रापि बोध्यम् । तस्मात् यथानुपूर्वीकं यथापूर्वकल्पं स्वरवर्ण पदक्रमादि विशिष्टो वेदः परमेश्वरात् प्रादुर्भूतो न तु परमेश्वरः प्रत्यक्षादि प्रमाणेनार्थमुपलभ्य प्रतिकल्पं विभिन्नयानुपूर्व्या नवं नवं वेदं विरचयतीति युक्तम् , प्रमाणाभावात् । अत एवोक्तम् शास्त्रयोनित्वात् "(ब्र० सू० 1–1–3) इति सूत्रभाष्यभामत्यां श्रीवाचस्पतिमिश्रेण" यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतंन्त्रता" तत्र सृष्टिप्रलयमनिच्छन्तो जैमिनीया वेदाध्ययनं प्रत्यस्मादृशगुरुशिष्यपरम्परामविच्छन्नामनादिमाचक्षते। वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेण अनाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्रयं पूर्वपूर्वसर्गानुसारेण तादृश तादृशानुपूर्वी विरचनात् । पुरुषास्वातन्त्रयमात्रमपोरुषेयत्वं रोचयन्ते जैमिनीया अपि। तच्चास्माकमपि समानमन्यत्राभनिवेशात् । न चैकस्य प्रतिभानेऽनाश्वास इतियुक्तम् । न हि

बहूनामज्ञानां विज्ञानां वाशयदोषवतां प्रतिभाने युक्त आश्वासः। सर्गादिभुवां प्रजापतिदेवर्षीणां धर्मज्ञानवैराग्यैश्वर्यसंपन्नानामुपपद्यते तत्स्वरूपावधारणां तत्प्रत्ययेन चार्वाचीनानामपि तत्र संप्रत्यय इत्युपपन्नं ब्रह्मणः शास्त्रयोनित्वं शास्त्रस्य चापौरुषेयत्वं प्रामाण्यंचेति" (भामती पृ० 90)

यच्चानुमानमुक्तं पौरुषेयत्वसाधकं वेदवाक्यं पौरुषेयं वाक्यत्वात् , कालीदासादिकाम्यवदित्यादि, तदपि न युक्तम् पुरुष प्रणीतत्वसाध्ये सिद्धसाधनात् । प्रमाणान्तरेणार्थमुपलभ्यविरिचितत्वसाध्ये मालतीमाधवादिषु व्यभिचारात् । एवमेव प्रमाणत्वे सति वाक्यत्वादित्यादि हेतुना आप्तप्रणीतत्वानुमानमपि निरस्तं वेदितव्यम् । आप्तप्रणीतत्वस्य आप्तेनोच्चार्यमाणत्वरुपस्य वेदापौरुषेत्ववादिभिरप्यभ्युपगमात् । प्रमाणान्तरेणार्थमुपलभ्यविरचितत्वरुपसाध्याभ्युपगमे च हेतोरन्यथा सिद्धेः। तथाहि अस्मदादिभिरुच्चार्यमाणेदानीन्तनवेदवाक्यानामिव सर्गाद्यकालिकानामपि तेषाम् ईश्वरोच्चार्यमाणत्वमात्रेण प्रमाणवाक्यत्वोपपत्तौ अनुमानस्य गतार्थत्वात् प्रमाणन्तरेणार्थमुपलभ्य विरचितत्वरुपपौरुषेयत्वस्य साधयितुमशक्यत्वात् । श्रुतयोऽपि वेदस्य नित्यत्वप्रतिपदिका वेदापौरुषेयत्वे प्रमाणम् । "बाचा विरुपनित्यया" नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनमित्यादिरुपाः अनादिनिधना नित्येत्यादिस्मृतिरपि प्रमाणम् । एवं श्रुतिस्मृतिशतवचनप्रामाण्यात् वेदानमपौरुषेयत्वं प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वराहित्यरुपं सिध्यति। पूर्वोक्त श्रुतिनामन्यार्थ परत्वेऽपि स्वार्थेतात्पर्यं न विरुध्यते।

पुरुष रचनारहितो वेदा नित्योऽनादि गुरुशिष्यपरम्पराप्राप्तोऽपौरुषेय इत्यत्रानुमानमपि प्रमाणम् वेदा अपौरुषेयाः सम्प्रदायाविच्छेदे सति अस्मर्यमाणकर्तृकत्वाद आत्मवत् । न च सम्प्रदाय विच्छेदः। संर्गाद्याकलिकं वेदाध्ययनमपि गुर्वध्ययनपूर्वकमध्ययनत्वात् साम्प्रताध्यनवत् इत्याद्यनुमानात् ।

किंच शब्दस्य नित्यत्वादपि वेदानामपौरुषेयत्वं सिद्धम् शब्दनित्यत्वे पूर्वोक्ता श्रुतिः स्मृतिश्च प्रमाणम् । श्रोत्रं नित्यद्रव्यग्राहकं निरवयवेन्द्रियत्वात् , मनोवत् इत्यनुमानमपि शब्दानित्यत्वसाधकं पूर्वोक्तमनुमानमनेकदोषदृष्टमिति तस्य साध्यासाधकत्वात् । शब्दोऽनित्यः सामान्यवत्वे सत्यस्मदादि बहिरिन्द्रिय प्रत्यक्षत्वादित्युक्तानुमाने कालाकाशादि प्रत्यक्षत्ववादि भाट्टमते तत्रैव कालाकाशादौ नित्ये व्यभिचारः। श्रोत्रं नित्यद्रव्यग्राहकं निरयवेन्द्रियत्वान्मनोवदित्यादि सत्प्रतिपक्षाच्च। ध्वनिमादायसिद्धसाधनाच्च किंच सोऽयं ककार इत्यादि निराबाधा अनादितः प्रवृत्ता प्रत्यभिज्ञाऽपि शब्द नित्यत्वसाधिका। उक्तंच

प्रत्याभिज्ञा यदा शब्दे जागर्ति निरवग्रहा।
अनित्यत्वानुमानानि सैव सर्वाणि बाधते।।

तस्मात् सिद्धं वेदानामपौरुषेयत्वम् । सिद्धे च तस्मिन् तेषां सकलपुरुषगतदोषराहित्यात् अवाधितानधिगतार्थबोधकत्वात् अव्याहतं स्वतः प्रमाण्यं सिद्धम् । पौरुषेयत्वे च पुरुषगतदोषसद्भावात् अबाधितार्थाप्रापकत्वात् प्रमाण्यं तत् स्वतन्त्रंच भज्येत। ईश्वरे दोषाभावात् कथं तटकृतवेदे दोषसदभाव इत्यपि न युक्तम् । वेदस्येश्वर कृतत्वे प्रमाणाभावात् । ईश्वर कृतत्वेऽपि वेदस्य प्रामाण्यंन स्यात् ।

मूलप्रमाणापेक्षणात् । आप्तेश्वरप्रामाण्यादेव वेदस्य प्रामाण्यं स्मादिति वेदस्यं प्रामाण्ये स्वतन्त्रता न स्यात् । एतत् सर्वं तत्वप्रदीपिकादिग्रन्थे विस्तरेण विचारितम् । किंच ईश्वरं कृतत्वेऽन्योन्याश्रोऽपि दुर्वारः स्यात् । सति वेदस्य प्रामाण्ये ईश्वरे तटकृतत्वे वा प्रामाण्यं ईश्वरकृतत्वाच्च वेदस्य प्रमाण्यमित्यन्योन्याश्रयः स्फुट एव। एवं वेदानामपोरुषेयमास्थेयम् । तच्च प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वाभावरुपम् । इतिशम् ।

वेदमन्त्रेष्वस्मच्छब्दार्थविचारः

स्व०, म० म० गिरिधरशर्मा-चतुर्वेदः

ये हि वेदानामपौरुषेयत्वमीश्वरकृतत्वं वास्थिषत, तैर्मन्त्राणामर्थनिर्वचनकाले येषां ह्यदे मन्त्राः प्रादुर्भूताः, तेषामेव वक्तृवमनुसंन्धेयं भवति। अन्येन प्रकारेणार्थनिर्वाहस्याशक्यत्वात् । न हि "योऽस्मान्द्वेष्टि यं च वयं द्विष्मः" इत्यादौ वक्तारमननुसन्धाय ईश्वरं वा वक्तारमनुसन्धाय ऋर्थोपपत्तिः सम्भवति, वक्तुरभावे निराधारस्य निर्विषयस्य वा द्वेषस्या-सम्भवात् , ईश्वरे द्वेषादि दोषस्वीकाराच्च। यदि चात्र तत्तत्कर्मसु मन्त्रप्रयोक्ता यजमानादिरेव वक्तृत्वेनानुसन्धेय इति समाधीयते, तथापि बहुत्र तदपि समाधानं न संभतत्येव। तथाहि-

"रमध्वं मे वचसे सोम्याय ऋतावरीरुपमुहूर्तमेवैः।

प्र सिन्धुमच्छा वृहती मनीषावस्युरह्वे कुशिकस्य सूनुः।।

[बिश्वामित्र ऋषिः नद्यो देवता, ऋ. 3/33/5]

विश्वामित्र नदीः प्रतिब्रूते- ऋतावरीः- ऋतमुदकम् , तद्वत्यो हे नद्यः, यूयं मे- विश्वामित्रस्य मम, सोम्याय सोमसम्पादिने, वचसे, तदर्थम् , एवैः शीघ्रगमनेभ्यः, मुहूर्तम्-मुहूर्तमात्रम् उपरमध्यवम् - उपरता भवत। सामान्येन नदीषूच्यमानासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनीं शतुद्रीं प्रति ब्रूते कुशिकस्य राजर्षेः, सूनुः विश्वामित्रो ऽहम् , वृहतीमहत्या, मनीषा-मनीषया-स्तुत्या, अपवस्युः-आत्मनो रक्षणमिच्छन् सन्, सिन्धुं-शुतुद्रीं त्वाम् , अच्छ-आभिमुख्येन, प्र अह्वे प्रकर्षेण आह्वयामि" इति, अस्य मन्त्रस्य सायणमाधवीयं भविष्यम् । तत्रेतिहासमस्य विश्वामित्र ऋषि सुदासः यैजवनस्य पुरोहितो बभूव, स वित्तं गृहीत्वा विपाढ् शुतुद्रयोः संभेदमाययौ, अनुययुरितरे। स विश्वामित्रो नदीस्तुष्टाव "गाधाभवत" इति [निरु 0 अ0 2] इत्यादि निरुक्तमप्यस्य मन्त्रस्य निदानतया प्रवृत्तं पर्यालोच्यम् । अपि च -

कारुरहं ततो भिषगुपलप्रक्षिणी नना।

नानाधियो वसूयवो नुगा इव तस्थिम-इन्द्रायेन्दो परिस्त्रव।

आडि.गरसः शिशुनामा ऋषिः सोमे देवता।

[ऋ0 सं0 9/12/3]

ऋषिः प्रवृत्तसोमयागः सन् दशापवित्रात् सोमेऽक्षरतिप्रतिबन्धकपापापनुत्तये पुस्चरितानु कीर्तनपुरः सरमध्येषणां चकार। तावत् - अहं कारुः स्तोमानां कर्तास्मि ततः पिता पुत्रो वा, भिषक् भेषजकृत- यज्ञस्य ब्रह्मेत्यर्थः।

तथा उपलप्रक्षिणी–बालुकासु यवान् हिनस्ति, तथाभूता, यद्वा दृषदादि–षूयलेषु भ्रष्टान् यवान् हिनस्ति–चूर्णयतीति, अथवा धानासक्तुक्रादम्भादीनां कारिका, नना–माता, दुहिता वा। एवं सर्वेषां परिचरणेन नानाधियः नानाकर्माणः, बसूयवः धनकामा वयम् अनुतस्थिम लोकमन्वास्थिताः स्मा। तत्र दृष्टान्तः गा इव। गावो यथा गोष्ठमनुतिष्ठन्ति, – स्वपयः प्रदानेन परिचरन्ति वा, एवं वयमपि परिचरन्तः एतत् ज्ञात्वा हे इन्द्रो। सोम। इन्द्राय परिस्त्रव– दशा– पवित्रात् क्षर "इति सायणभाष्यम्। अन्यच्च–

अकारि त इन्द्र गोतमेभिब्रह्माण्योक्ता नमसा हरभ्याम्।

सुपेशसं वाजमापरा नः प्रातर्मक्षू धिया वसुर्जगम्यात्॥

[नोधा गौतम ऋषिः, इन्द्रो देवत, कृ0 1श्र 63/9]

हे इन्द्र, ते–तव, गोतमेभिः–गन्तृतमैरे तत्संज्ञैः ऋषिभि, अकारिस्तोत्रं कृतमित्यर्थः। एतदेव स्पष्टीकरोति–ब्रह्माणि–मन्त्रजातानी, नमसा, हविर्लक्षणेनान्नेन सह, हरिभ्याम् – अश्वाभ्यां युक्ताय तुभ्यम्, ओक्ता–आभिमुख्येनोक्तानि। यद्वामर्यादायाभाकारः, यथाशास्त्रम् प्रयुक्तानि। स त्वम् सुपेशसं–बहुविधरुपयुक्तम्, वाजम् – अन्नम्, नः–अस्मभ्यम्, आभर आहर देहीतियावत्। धिया बुद्ध्या कर्मणा वा प्राप्तधन इन्द्रः प्रातः काले अस्मद्क्षणार्थः जगम्यात् – आगच्छतु, इति सायणमाधवीये भाष्यम्। अपरंच–

प्रियमेद्यवदत्रिवज्जातवेदो विरुपवत्।

आङि.गरस्वन्महिव्रत। प्रस्कण्वस्य श्रुधी हवम्॥

[कृ0 1/45/3 प्रस्कण्व ऋषिः, अग्निर्देवता]

हे महिव्रत–प्रभूतकर्मन्, जातवेदः–अग्ने। प्रस्कण्वस्य–कण्वपुत्रस्य महर्षेः, हवम् आह्वानम्, श्रुधि–शणु। तत्र चत्वारो दृष्टान्ताः प्रियमेधात्रिविरुपाङि.गरोनामकाः। एतेषामाह्वानं यथा शृणोषि तद्वत्। इति सायणमाधवीयं भाष्यम्। अपरमपि–

अक्षवं हि भूरिदावत्तरा वां विजामातुरुत वा घा श्यालात्।

अथा सोमस्य प्रयती युवभ्यामिद्राग्नी स्तोमं जनयामि नव्यम्॥

[कुत्स आङि.गरसः ऋषिः, इन्द्राग्नी देवने

ऋ0 1/109/2]

"हे इन्द्राग्नी, वाम्–युवाम्, भूरिदावत्तरा–अतिशयेन बहुधनस्य–दातारविति, अक्षवं हि अक्षौषं खलु। कस्मात् पुरुषात्? विजामातुः श्रुताभि–रुप्यादिभिर्गुणैर्विहीनो जामाता यथा कन्यावते–बहुधनं प्रयच्छति कन्यालाभार्थम्। ततोप्यतिशयेन दाताराविन्द्राग्नी इत्यर्थः। उत वा– अपि च, श्यालात् – श्यालः–कन्याभ्राता, स यथा भगिनीप्रीत्यर्थं बहुधनं प्रयच्छति, ततोऽप्यतिशयेन दाताराविन्द्राग्नी। घ इति पादपूरणः। तथा च सति अथानन्तरम्, हे इन्द्राग्नी, युवभ्यां सोमस्य प्रयती–अभीषुतस्य सोमस्य प्रदानेन सह, नव्यम् – नवतरम् – प्रत्यग्रम्, स्तोमं–स्त्रोत्रम्, जनयामि–निष्पादयामि इति सायणमाधवीयं भाष्यम्।" अग्रेऽपि च –

"आभोगयं प्रयदिच्छत एतनापाकाः प्रांचो मम् केतिदापयः।

साधन्वनासश्रवरितस्य भमना गच्छत सवितुर्दाशुषो गृहम्॥"

[कुत्स ऋषिः, कृभवो देवताः। ऋ0 1/110/2]

"हे कृभवः, अपक्वाः– परिपक्वज्ञानाः, प्रांचः पूर्वकालीनः, मम आपयः प्राययितारो मदीया ज्ञातय इति केचित् एवम्भूता ये केचन यूयम् आभोगयम् – उपभोग्यं सोममिच्छन्तः, यत् यदा प्र एत न तफ्चरितुमरण्यं गतवन्तः। कृभवो हि सुधन्वन आङि.गरसस्य पुत्राः। तदुक्तं यास्केन– "कृभुर्विक्वा वाज इति, त्रयः पुत्राः सुधन्वन आङि.गरसस्य बभूवुः "[नि 0 11/6] इति।" कुत्सोऽप्याङिगरसः। अतस्तेन मदीया ज्ञातय इत्युक्तम्। हे सौधन्वनासः सुधन्वनः पुत्राः, तदानीम् चरितस्य–समुपार्जितस्य तपसः, भूमना–भूम्ना–बहुत्वेन, दाशुषः हवींषि दत्तवन्तः, सवितुः सोमाभिषवं कुर्वतः, यजमानस्य सम्बन्धि यज्ञगृहम्, आगच्छत तपसा लब्धसोमाः सन्तः कृतपाना यूयं गतवन्तः। यद्वा दाशुषः प्रातः सविनादिषु अग्न्यादिभिरपसारितेभ्यः ऋभुम्यः सोमपानं दत्तवतः सवितुर्गृहं निवासस्थानं तृतीयसवनाख्यम् – गच्छत प्राप्ताः।" इति सायणमाधवीयं भाष्यम्।

एवं विधेषु शतशो मन्त्रेषु तत्तदषीणामस्मच्छदेन ग्रहणादतिरिक्तानास्ति कापि गतिः। न हि सर्वः कर्मकाण्डेषु मन्त्राणां प्रयोक्ता कुशिकस्य सूनुर्भवति। नापि सर्वः कारुर्भवति। न वा सर्वस्य नना उपलप्रक्षिणी भवति। "अकारि त" इतयादौ च स्तोतृत्वेन वक्ता स्वयं, स्वगोत्रं नाम, अन्येषांच स्तोत्राणां निर्दिशति। "नव्यं स्तोमं जनयामि" इति स्वस्य कर्तृत्वं ख्यापयति च। अन्तिमे "मम प्राज्वः" इति स्तोतव्यं प्रति ब्रुवन् स्वस्य तद्वंशजत्वं ख्यापयति। न ह्येतत्सर्वं सर्वेषु प्रयोक्तृषु संभवति।

तथैव–

अग्निः पूर्वेभिऋषिभिरीड्यो नूतनैरुत। स देवां एह वक्षति।

[कृ0 1/1/2]

"इति शुश्रुम धीराणां ये नस्तद् विचचक्षिरे।" [यजु0 अ0 4] इत्यादिषु पौर्वापर्यानुसन्धानादिकं च ऋषीणामेव वक्तृत्वमभिप्रेत्योपपद्यते, नेतरथा। श्रीमाधवाचार्यप्रभृतिभाष्यकारैरपि च सर्वत्र द्रष्टृणामेव वक्तृत्वमवलम्ब्य व्याख्यानं कृतम्। इति प्राक्तनभाष्यानुसृत्य द्रष्टृहणामेव वक्.तृत्वमनुसन्धाय मन्त्रार्थः प्रातिष्ठत् इति सुस्पंष्टम्।

स्वामिदयानन्दप्रक्रियाविचारः

अथ श्रीदयानन्दस्वामिनां भाष्ये तु मन्त्राणामर्थव्यवस्था कापि न दृश्यते, क्वचिदीश्वरो वदति हे मनुष्याः। इत्यादि, क्वचिच्च मनुष्या वदन्ति अहं स्तौमि ईडे, प्रशंसामि, इत्यादि।

प्रकरणसंगतिरपि न दृश्यते–एकसमिन्नेव सूक्ते अत्यन्तसन्निहितयोरपि मन्त्रयोः परस्परं कापि संगतिर्नोपलभ्यते, ऋषिदैवतादिव्यवस्था–बोधकानि सर्वानुक्रमणीसूत्रादीनि विनियोगबोधकानि श्रौतसूत्रादीनि च तैर्नाद्रियन्त इति स्पष्टमेव। निरुक्ते श्रद्धावन्तोऽपि तत्र तत्र स्वीये भाष्ये तत्तन्मन्त्रस्य निरुक्तकृतं व्याख्यानमुद्धरन्तोपि तदनुकूलतां स्वकीये व्याख्याने ते न निर्वहन्ति।

जैमिनिमृषिं मन्वानां अपि मीमांसाशैलीं सर्वथैव प्रायेण परित्यजन्ति। ईश्वरेणैव मन्त्रार्था ऋषिभ्यो बोधिताः, ते च ऋषिभिर्ब्राह्मणदृष्टां मन्त्रार्थशैलीं दूरमुत्सारयन्ति। शब्दार्थ भावार्थयोः सर्वदा सामंजस्यमपि सर्वत्र न निरुह्यते। तस्मान्मन्त्रार्थे तेषां स्वातन्त्र्यमेवेत्यगत्या वक्तुमापतति। केवलं व्याकरणे " व्यत्ययो बहुलम् " इति सूत्रं लुप्तोपमालङ्.कारस्चाधिक्येन तेषामवलम्बनम्। तत्श्चास्मत्प्रकृतिविचारविषयी भूतोऽस्मच्छब्दार्थोपि तत्र न व्यवस्थापितः प्रतीयते, तथापि तद्भाष्येऽपि अन्यच्छब्दार्थः प्रवर्त्तत्वेति बहुत्र व्यजत एव। तत्र

कतिचिन्निदर्शनान्युपस्थापयामः।

"रमध्वं मे वचसे सौम्याय ऋतावरीरुपमुहूर्तमेवैः। प्रसिन्धुमच्छा वृहती मनीषा वस्युरह्वे कुशिकस्य सुनुः 13/33/51 अत्र स्वामिदयानन्दभाष्यम् – "(पदार्थः)" रमध्वम्–क्रीडध्वम्, मे, मम, वचसे वचनाय, सौम्याय–सोम इव शान्तिगुणयुक्ताय ऋतावरीः ऋतं पुष्कलमुदकंविद्यते यासु ताः, उपमुहूर्तम् – कालावयवम् , एवैः प्रापकैर्गुणैः, प्रसिन्धुम् – समुद्रम् अच्छ–सम्यक् , अत्र निपातस्य चेति दीर्घः। वृहती–महती, मनीषा–प्रज्ञा, अवस्यु आत्मनो व इच्छुः, अह्वे–प्रशंसामि, कुशिकस्य विद्यानिष्कर्षप्राप्तस्य, अत्र वर्णव्यत्ययेन मूर्धन्यस्य तालव्यः। सुनुः अपत्यमिति वर्तमानः।

भवार्थः अत्र वाचकलुप्तोपमालंकारः। यथा नद्यः समुद्रभिमुखम् गच्छन्ति, तथैव मनुष्याः विद्या धर्म्यव्यवहारं प्रत्यभिगच्छन्तु, येन सुखेन समयो गच्छेत् इति।

अत्र उपेत्युपसर्गः क्वान्वेति, इति नैव व्याख्यातम् । "छन्दसि परेऽपि" व्यवहिताश्च" इति पाणिनिसूत्रानुसारमस्य रमध्वमिति क्रियया सम्बन्धो न्याय्यः। तथैव च निरुक्तकृता" उपरभध्वमिति विवृण्वता कृतः ततश्चोपरम्–धातोः क्रीडध्वमित्यर्थः नोपपद्यते। कुशिकपदे निष्प्रणामं वर्णव्यत्ययं प्रकल्प्यामि, सुनुशब्दे प्रमाणैरसिद्धामुपमां प्रकल्प्यामि, विश्वामित्रो नदीस्तुष्टाव इति निरुक्तकृदुक्तिमगणयित्वापि सर्वस्मिन्मन्त्रे लुप्तोपमां कल्पनामात्र सारामुद् भाव्यापि कोऽयमात्मनो अव–रक्षणम् इच्छति, को वा प्रशंसामीत्यस्य कर्ता कुत्र वा वहती मनीषेत्यनयोरन्वयः, इति किमपि न स्पष्टीकृतम् । "नदीवन्मनुष्या विद्या धर्म्यव्यवहारं प्रत्यभिगच्छन्तु" इत्ययं केषां पदानामभि प्रायः? "बृहती" मनीषा इति न द्वितीया विभक्तत्न्ते उक्ते, ययोः प्रामिह्वये इत्यनेन सम्बन्धः स्यात् । अभिह्वये इत्यस्योत्तमपुरुषस्य मनुष्या गच्छन्त्विति कथं लापनसंभवः? मे सोम्याय वचसे" इत्यनेन विद्याधर्मव्यवहारः सिद्ध्यतीति चेत् क एवमुपदिशति? ईश्वर इति चेत् , न स अवस्युः अव इच्छति, न वा सः कुशिकस्य सूनुखि। न च तस्य कस्यचित् प्रशंसया प्रयोजनम् । यदि प्रयोक्ता मनुष्यो वदति तर्हि न सर्वोऽपि मनुष्यः स्ववचनमनुसर्तुं सर्वानुपदेष्टुमीष्टे। कश्चिन् मेधावी धार्मिकः पुरुषः उपदिशतीति चेन् मन्त्रद्रष्टा ऋषिरेवोपदिशति, इत्युक्तौ को विरोध आग्रहादृते। अनादित्वभङ्गशङ्काया उभयत्र तुल्यत्वात् । यदि मेधावी धार्मिकपुरुषोत्पत्यनन्तरं मन्त्रं प्रवृत्तः तर्हि नानादिः, यदि स उत्पत्तेः पूर्वमेव ईश्वरेणाभिसंहितः, तर्हि विश्वामित्रोऽपि पूर्वमेवाभिसन्धातुं शक्यः, मनुष्याः प्रवाहनित्याः इति चेद् विश्वामित्राद्या अधिकारिणोऽपि तथेति ऋषेः प्रवक्तुरेव वक्तृत्वमत्र तुल्यन्यायात् व्यंजितं भवति।

अथ तत्सूक्तान्तर्गत एव तदुत्तरे मन्त्रे" इन्द्रो अस्मां अरदद् विलिखेत् वज्र बाहुरपाहनं वृत्रं परिधि नदीनपाम्, देवोनयत् सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वाः [ऋ0 सं0 3 ।33/6]

श्री दयानन्द भाष्यम् – [पदार्थः] इन्द्रः परमैश्वर्यवान् राजा, अस्मानू अरदत् – विलिखेत् वज्रबाहुः शस्त्रभुजः अप अहन् – हन्ति, वृत्तम् – आवरकमेद्यं, परिधिम् – सर्वतोधीयन्ते नद्यां नद्यो यस्मिंस्तम् , नदीनाम् देवः दिव्यगुणस्वभावम् अनयत् – नयति, सविता–सूर्यः, सुपाणिः शोभनहस्त, "तस्य" वयं प्रसवे–ऐश्वर्ये यामः प्राप्नुयाम् , उर्वी–बहुसुखप्रदाः प्रजाः।

भावार्थः अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो भूम्यादीनामाकर्षणेन व्यवस्थाप्य वर्षाः कृत्वैश्वर्यं जनयति तथैव वयं सद्गुणानाकृष्याऽरीन् विजित्य राज्यश्रियं जनयेम" इति, एवं व्याख्यातपूर्वेण मन्त्रेण सहास्य न कोऽपि सम्बन्धः तत्र विद्याधर्म्य व्यवहारभिगमोपदेशः, इह तु शत्रुविजयराज्यश्रियोरभिलाष इति न प्रकरणसंगतिः। नद्यः प्रत्यंच् इति निरुक्तकारानादरश्च स्फुट एव। अस्मान् अरदत् इति लिखेत् इति को वदति। किं कश्चन शिष्टो दुष्टो वा?

शिष्स्चेत् परमैश वर्यवान् राजा, तं किमर्थं विलिखेत् हन्यात् ताडयेद्वा। अथ दुष्टः स कथमैश्वर्यमाप्नुयात् ? तस्मादस्यनित्यस्य सम्बन्धो नोपपद्यत एव ऋते प्रवक्तुर्वक्तृत्वाश्रयणात् । सर्वश्च परमैश्वर्य वान् राजा वृत्तम् , आवरणं मेद्यं कथं हन्तुं शक्नुयात् ? नदीनाम् इति पदस्य क्वापि सम्बन्ध एव न योजितः, न वा लुप्तोपमापि तत्रोक्ता। तस्मादत्राप्यस्मच्छब्दस्य वक्तृपरत्वाश्रयणेनैव निर्वाहो व्यनंजितः। एवं विधराजोत्पत्यनन्तरं मन्त्राप्तादुर्भावे अनादित्वभड्गशड्.कापि तदवस्थैव, इति दृष्टा ऋषिरेव नदीमुखेन वक्तीति कल्पने नास्ति क्षतिः।

अश्रवं हि भूरिदावत्तरा वां विजामातुरुतवाद्या श्यालात् ।

अथा सोमस्य प्रयती युवाभ्यामिन्द्रग्नी स्तोमं जनयामि नव्यम् ।।

श्री दयानन्दभाष्यम् –[पदार्थः] अश्रवम् श्रृणोमि [हि] किल [भूरिदावत्ततः] अतिशयेन बहुधनदानप्राप्तिनिमितौ (वाम्) एतौ (विजामातुः) विगतौ विरुद्धश्च जामाता च तस्मात् (उत) अपि (वा) (द्य)एव अत्र "ऋचि तु" इति दीर्घः। (सोमस्य) ऐश्वर्यप्रापकस्य व्यवहारस्य (प्रयती) प्रत्ययै प्रदानाय। अत्र प्रपूर्वाद्यमधातोः क्तिन्–तर्स्माच्चतुर्थ्येकवचने सुपां सुलुगितीकारादेश (युवाभ्याम्) एताभ्याम् (इन्द्राग्नी) पूर्वोक्तौ (स्तोमम्) गुणप्रकाशम्। (जनयामि) प्रकटयामि (नव्यम्) नवीनम् ।

भावार्थः सर्वेषां मनुष्याणां विद्युदादिपदार्थानां गुणज्ञानसम्प्रयोगाभ्याम् नूतनम् कार्य सिद्धिकरम्। कलायन्त्रादिकं विद्यायानेकानि कार्याणि निर्वृत्य धर्मार्थकामसिद्धिः सम्पादनीयेति।"

अत्रापि नवीनं सोमं गुणप्रकाशम् इन्द्राग्न्योः को जनयति? जनयामीत्यस्य कः कर्ता? यः ताविन्द्राग्नी जामात्रपेक्षया श्यालापेक्षयाचापि अधिकदात् तमी श्रृणोति स च ऐश्वर्यप्रापकस्य व्यवहारस्य प्रदानाय गुणप्रकाशम् करोतीति मन्त्राक्षरैर्लम्यते। सोऽयं नेश्वरो भवितुमर्हति, तस्य दानप्राप्यादीच्छाविरहात् । न वा सर्वो मनुष्यः सर्वेषां तादृशगुणप्रकाशजनने असामर्थ्यात् । वैज्ञानिको मेधावी कश्चन पुरुषविशेष एव जनयामीत्यस्य कर्ता सिद्धयेत, स च मन्त्रद्रष्टा ऋषिरेव प्रधानप्रत्यासत्याग्राह्य इत्यत्रापि वक्तुरस्मत्पदेन ग्रहणं स्वामिभिर्व्यन्जितम् ।

"आभोगयं प्रयदिच्छन्त एतनापाकाः प्रांचो मम केचिदापयः।

सौधन्वनास्श्चरितस्य भूमना गच्छत सवितुर्दाशुषो गृहम् ।।

अत्र स्वामिभाष्यम् (पदार्थः) (आभोगयम्) आसमन्तात् भोगेषु साधुंव्यवहारम् । अत्रोभयसंज्ञान्यपि छन्दांसि दृश्यन्त इति भसंज्ञानिषेधादल्लोपाभावः (प्र) यत् (इच्छन्तः) (एतन) प्राप्नुत (अपाकाः) वर्जितपाकयज्ञाः यतयः (प्रांजः) प्राचीना (मम) (केचित्) (आपयः) विद्यामाप्तुकामाः (सौधन्वनासः) शोभनानि धनानि धनूंषि येषु ते सुधन्वानस्तेषु कुशला सौधन्वाः (चरितस्य) अनुष्ठितकर्मणः (भूमना) बहुत्वेन, अत्रोभयसंज्ञान्यपीति भसंज्ञाभावादल्लोपाभावः (अगच्छत्) (सवितुः) ऐश्वर्ययुक्तस्य (दाशुशः) दानशीलस्य (गृहम्) निवासस्थानम् ।

भावार्थ : हे गृहस्थादयो मनुष्याः, यूयं परिव्राजां सकाशत् सत्याः विद्याः, प्राप्य क्वचिद्दानशीलस्य सभां गत्वा तत्र युक्तत स्थित्वा, निरभिमानत्वेन वर्तित्वा विद्याविनयौ प्रचारयत।" इति

अत्र भावार्थच्छादया प्रतीयतेईश्वर एव वक्ता भाष्यकर्तु रभिमत इति। परं मम इत्यस्य केन सम्बन्ध इति न शब्दार्थे न वा भावार्थे व्यक्तीभवति। तस्य सम्बन्धविचारेऽवश्यं प्रवक्तुर्ग्रहणमपि व्यंजितं स्यात् ।" ऋभुर्विभ्यां वाज इति त्रयः पुत्राः सुधन्विन आडि.गरसस्य बभूवुः।

(निरु0 11 अ0 2 पा0 4 ख0) इति सौधन्वनासः पदस्य निरुक्तोक्तोऽर्थोप्युपेक्षितः। तेनापि

प्रवक्तुर्वाक्यमिदमिति स्फुटं स्यात् । परिव्राजां सकाशाद्विद्यां लब्ध्वा धनुषि कौशलप्राप्तिः ततश्च दानशीलस्यनिवासस्थाने गमनमिति सर्वमिदं विचित्रमेव। अथापि ऐश्वर्ययुक्तानां दानशीला नामुत्पत्यनन्तरं मन्त्रोऽयं पठितश्चेदअनादिता वेदस्य भज्येतैव। पूर्वमेव सर्वज्ञतया ईश्वरेण तदुत्पत्तिं विज्ञाय मन्त्र उपदिष्टश्चेत् तत्रद्वयक्तीनामप्युत्पत्तिरीश्वरेण पूर्वमेव विज्ञायोपादिश्यतेत्यत्र को विरोधः? तत्श्च मन्त्रद्रष्टुरेव वक्तृत्वाश्रयणेऽपि न कश्चिद्विरोधः। यथा हि तत्तद्गुणविशिष्टा मनुष्याः पूर्वमेवेश्वरेण विज्ञायन्ते तथा तत्तन्नामानो व्यक्तयोऽपि पूर्वं कुतो न विज्ञायन्ते? न हि सर्वज्ञस्य किंचिदपि परोक्षं स्यात् । एवं पूर्वमेव भविष्यतो जनानुसन्धाय सर्वज्ञ ईश्वर उपदिशतीति "अग्निः पूर्वेभिऋषिभिरीड्यः" [ऋ0 सं0 1/1/2] इति मन्त्रभाष्ये श्रीदयानन्दस्वामिभिः स्पष्टं स्वीकृतम् –

सर्वज्ञेनेश्वरेण स्वकीयज्ञानान्मनुष्यज्ञानापेक्षयाऽतीतान् वर्तमानांश्चीषीन् विदित्वास्मिन्मन्त्र उपदिष्टे सति नैव कश्चिद्दोषो भवितुमर्हति, वेदस्य सर्वज्ञवाक्यत्वात् । इति। एवं चेतरमनुष्य मुखेनेश्वरेण ते त उपदेशाः प्रयोजिताः इति कल्पापेक्षया दृष्ट्हणामृषीणामेव मुखात्प्रयोजिता इत्येव कल्पनं साधु भवतीति स्वामिभाष्यमपि नात्र विशेषेण प्रतिकूलं भवति। तथा सत्यर्थनिवार्हश्च सम्यग् भवतीत्युपदर्शितमेव। निदर्शनमात्रमिदम्, पर्यालोचने शतशः स्थानानि तादृशानि, यत्र दृष्टुर्वक्तृत्वमप्रकल्प्रय अर्थनिर्वाहो न शक्यत एव कर्तुम् । न च तथा प्रकल्पने कोऽपि विरोधो भवति, अपौरुषेयत्ववादिनो ऽपि तम्मुखादीश्वर एवं प्रकाशयति इति समाधातुं शक्नुवन्ति, ईश्वरस्यापि न वक्–तृत्वमिति मन्यमाना मीमांसका अपि भूतं भवद् भविष्यदिति सर्वं वेदेन प्रकाश्यत इत्यभ्युपगच्छेयुरेव, तस्माद्भविष्यतामपि वक्तृत्वानुसन्धानं न विरुद्धमिति सम्यक् पर्यालोच्यम् ।

बृहदारण्यकोपनिषद्भाष्ये (अ0 2/ब्रा0 5/17 कण्डि) च मधुविद्याप्रसंङ.गे "आर्थवणायाश्विना दधीचे" त्यादिमन्त्रं व्याचक्षाणाः श्रीशंङ.करभगवत्यादा अपि"हे अश्विनाविति मन्त्रदृशो वचनम्" इत्याहुः। तदेव च तुल्यन्यायेन अन्यत्राप्यनुसन्धेयं स्यादिति नात्र विवादावसरः।

"यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्.क्ते, तद्दैवतः स मन्त्रो भवति" [नि 0 दै0 का0 7]

"एव मुच्चावचैरभिप्रायैऋषीणां मन्त्रदृष्ट्यो भवन्ति" [नि 0 दै0 का0 अ0 7]

इत्यादीनां भगवद्यास्कोक्तीनां च स्पष्टमिदमेव तात्पर्यम् । तथा च द्रष्ट्रणाम् ऋषीणामेव वक्तृत्वं सर्वत्रानुसन्धेयं भवतीति निर्विवादम् । परं क्वचिद् दृष्टा ऋषिरन्यमुखेन वक्–तव्यम् प्रकाशयति। काव्येषु या कविनिबद्धवक्तृणामुक्तिदृश्यते, यां च ध्वनि भेदप्रसङ्.ग आलंकारिकाः "कवि प्रौढोक्तिसिद्धोऽर्थः" "कविनिबद्धवक्तृप्रौढोक्तिसिद्धो ऽर्थः" इति पृथग् गणयन्ति, सा प्रक्रिया वेदमुपजीव्यैव प्रवृता।

पिप्पल्यः समवदन्तायतीर्जननावधि। [अथर्व सं0 का0 6 सू0 म0 2] यं जीवमश्नामहे न स रिष्यति पूरुषः।।

आयतोः दीर्घाः पिप्पलीनामिका ओषधयः, समवदन्तपरस्परं संवादं चक्रुः। किमित तदाहजननावधि जन्मतः प्रभृति, यं जीवम् अश्नामहेप्राप्नुयाम् योऽस्मान् जन्मतः प्रभृति सेवते। स पुरुषः न रिष्यतिक्लिष्टो न भवति। रोगं न प्राप्नोतीति भावः।"

अत्रोत्तरार्द्धं पूर्वार्धस्यान्तिमं च पदं पिप्पलीनामुक्तिः।

किंच औषधयः संवदन्ते सोमेन सह राज्ञा। [भिषग् ऋषिः, ओषधयो देवता ऋ0 10/17/42]

यस्मै कृष्णोति ब्राह्मणस्तं राजन् पारयामसि।।

इन्द्रो अस्मां अरद्द वज्रबाहुरपाहन् वृत्रं परिधिं नदीनाम् ।

देवो नयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः।।

[नद्यः ऋषिकाः, विश्वामित्रः प्रतिपाद्यः। ऋ0 3/33/6]

इत्यादिषु शतशो मन्त्रेषु भूरिभूरि प्रक्रियेयमामृड्यते। तदनया प्रक्रियया निबद्धेषु मन्त्रेषु सूक्तेषु वा बहुत्र द्रष्ट्रणामृषीणाम् स्थाने तन्निबद्धानां वक्तृणामेव नाम ऋषित्वेन व्यवहृतं दृश्यते। त एव च भवन्ति तत्रास्मच्छब्दग्राह्याः।

तदेतत्स्पष्टीकृतं श्रीगुरुचरणैर्विद्यावाचस्पतिश्रीमधुसूदनशर्ममैथिलैः "महर्षिकुलवैभवे"।

तदुक्तान् मन्त्रान् भाष्यव्याख्यया संयोज्यात्रोदाहामः स्पष्टप्रतिपत्तये। "सर्वथाऽपि येनायं मन्त्रोऽर्थं दृष्ट्वोपदिष्टः सोऽस्य मन्त्रस्य ऋषिरुच्यते। ऋषिभिरेवैते मन्त्राः पुरोपदिष्टाः। तस्मात् पारोवर्यविदोऽमीद्रष्टार एवैतेषां मन्त्राणं प्रवक्तारः ऋषयः प्रायेण दृश्यन्ते। क्वचित्पुनरनृषयोऽप्येषामृषयो निर्दिश्यन्ते। वक्तृत्वेन विवक्षणात्

तेषु चेदमृषित्वं गौणं दृष्टव्यम्, काल्पनिकत्वात् । तथा हि पंचविधो मन्त्राणां वर्गो भवति–

1. भाववृत्तम् 2. देवस्तवः 3. वक्तात्मस्तवः 4. देवात्मस्तवः 5. कयोश्चित्संवादो वेति। तत्र सृष्टिक्रमः निरुपणं भाववृक्तम् । प्राणद्देवानां स्वरुपधर्मप्रदर्शनं देवस्तवः। तयोरयं मन्त्रप्रवक्तैव ऋषिः। दृष्टृत्वाच्च वक्तृत्वाच्च् । देवता तु तत्र सृष्टिविश्रयो वा प्राणदेवा वा। वक्तात्मस्तवेऽपि अयं मन्त्रप्रवक्ता आत्मानं स्तौतीति स एव स्यादृष्भिच देवता च। अथ चतुर्थे देवात्मस्तवे तु मन्त्रप्रवक्ता प्रतिपाद्यं देवं तद्देवमुखेनैव स्वावयति। तत्र तस्य प्राणदेवस्यैव वक्तृत्वेन विवक्षपात् स एव स्याद् ऋष्भिच देवता च। मन्त्रप्रवक्तुस्तु वक्तृत्वेऽपि तत्र ऋषित्वमयहडूयते। एवं पन्चमे संवादेऽपि मन्त्रप्रवक्तुऋषित्वपहूयते। ययोस्तु संवादो वर्ण्यते, तयोर्मध्ये वक्तुऋषित्वम् सम्बोध्यस्य च देवतात्वमीति पर्यायेणोभयोऋषित्वं देवतात्वं च विवक्ष्यते इति।

तदुक्तंबृहद्देवतायाम्–

"नवकः प्रथमस्त्वासाम्" (इत्यादि पूर्वोक्तम्)।

इन्द्रः सीतां निगृहडातु तां पूषानुयच्छतु।

सा नः पयस्वतो दुहामुत्तरामुत्तरां समाम्।।

[वामदेव ऋषिः, सीता देवता। ऋ0 4/57/7]

सीताऽत्र हलपद्धतिः– हलेन भूमौ कृता रेखा। साऽत्र मन्त्रे स्तूयते। इमां सीतां हलकृतां रेखाम्, इन्द्रः वृष्टिकर्ता देव/, निगृहणातु अनुगृहणातु पूषा च देवः, अनुयच्छतु–खाद्यं ददातु अत्रैवात्रमुत्पादयत्वित्यर्थः। सा पयस्वती–सस्यशालिनी सीता, उत्तरामुतराम् समाम् प्रत्येकमाश्रमेषु वर्णेषु, नः अस्मभ्यम्, दुहाम्–अन्नादिकं दोग्धु"।

भाष्यकृन्माधवाचार्यस्तु आधारकाष्ठं सीतेत्याह। अत्र रेखादिकं जडपदार्थः किमिति स्तूयते? किं स श्रृणोति? इत्याद्यानां शङ्कानां तत्र तत्राभिमानिनी देवता स्तूयते, इत्येव शिष्टसम्मतं समाधानम् ।

अभिमानिनी देवता च सर्वत्रानुस्यूता देवरुपा प्राणशक्तिरेव। तस्मादुक्तासु विद्यासु द्वितीयविधायाम् देवस्तवेऽन्तर्भवत्ययं मन्त्रः। वामदेवः सीतां स्तौतीति प्रकृते तात्पर्यम्"।

अथ प्रजापतेरङ्गिरसः पुत्री दिव्यस्याङ्गिरस्य भगिनी दक्षिण नाम्नी ऋत्विग्भ्यो दीयमानां दक्षिणां स्तौति–

तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम्।

स शुकस्य तन्वो वेद तिस्त्रो यः प्रथमो दक्षिणया रराध।।

[अत्र दक्षिणा ऋषिका, दक्षिणा चान्या देवता। ऋ0 10/907/6]

अत्र माधवाचार्यः– "तमेव दक्षिणायाः दातारम्, ऋषिम्–अतीन्द्रिचार्थ–दर्शिनम् सत्कर्मकरणे ऋषिमित्याहुः। तथा तमु–तमेव ब्रह्माणमाठुः। किं च तमेव यज्ञन्यम्–यज्ञस्य नेतारम् अध्वर्यु मित्याहुः। तमेव सामगाम् साम्नां गातारमिति, तथा उवथशासम्–शस्त्राणाम् शंसितारं होतारं द्रवन्ति। दक्षिणादानेन तत्रत्कर्मणः परिग्रहात। स दाता, शूद्रस्य दीप्यमानस्य ज्योतिषः, तिस्त्रः तन्वः अग्निवैद्युतादित्यात्मकनि त्रीणि शरीराणि, वेद–जानति। यद्वा शुक्रस्य दीप्तस्याग्नेः आह्वनीयाद्यात्मकानि त्रीणि शरीराणि जानाति। प्रथमो मुख्यो योजनः दक्षिणया रराध ऋत्विगादीनाराधयति। अत्र यद्यपि दिक्षणैव ऋषित्वेन दक्षिणैव च देवतात्वेनोच्यते, तथापि आत्मस्तवोऽत्रेति शंका न कार्या। दक्षिणापदार्थस्योभयत्र भिन्नत्वात्"। तस्मादयमपि देवस्तव एवान्तर्भवति।

अथागस्त्यदृष्टेऽगस्त्येन्द्रसंवादे–प्रथमायामगस्त्य ऋषिरिन्द्रो देवता। द्वितीयस्यामिन्द्र ऋषिरगस्त्यो देवता।

किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव।

तेभिः कल्पस्व साधुया मा नः समरणे वधीः।।

[ऋ0 1।170।2]

अत्र माधवाचार्यः–

"इदमगस्त्यवाक्यम्। हे इन्द्र नोऽस्माननपराधिनः, किं निहन्तुमिच्छसि। कथमवध्यत्वमत आह मरुतस्तव भ्रातरः त्वया भोगदनेन भरणीया इत्यर्थः।

अतो वयमवध्या इत्युक्तं भवति। मरुतामिन्द्रभातृत्वमेकस्मिन्नेव दितिगर्भे उत्पन्नत्वात्। सा चोत्पत्तिः पुराणेषु प्रसिद्धा। सन्तु भ्रातरः, तत्त्च किमित्याह–तेभिः तैमेरुद्‌भिः सह साधुया साधुत्वं कल्पस्व हविर्भागान्, तैः सह युद्धं वा, नः अस्मान् समरणे संग्रामे, मावधीः मा हिंसाः। यद्वा क्लृप्तेर्दृष्टान्तः– संग्रामे यथा विरोधिनं हंसि न तथा"

किन्नो भ्रातरगस्त्य सखा सन्नति मन्यसे। [ऋ0 1।170।3]

विद्‌या हि ते यथा मनोऽस्मभ्यभिन्न दित्ससि।।

इदमिन्द्रवाक्यम्। हे भ्रातः हे अगस्त्य, हविः प्रदान वरप्रदानाभ्यां परस्परोपकारकत्वात् भ्रातृत्वम्। तादृशस्त्वं सखा सन् अस्मद्धितकार्यपि सन्, नोऽस्मान्, किमति मन्यसे– कस्मादपराधादतिक्रम्य मनुषे अपलपसि। नायमपलासः, किन्तु तथ्यमेवेति चेदुच्यते मन्तव्यं ते तव, मनो मानसम्, यथा यथावत्, विद्मः जानीमः।

कथं जानीयेति उच्यते–

अस्मभ्यभिन्न दित्ससि अस्मदर्थं निरुप्तमस्मभ्यं दातुं नेच्छसि एव। अत संवादः स्पष्टः। तत्र वक्ता ऋषिर्भवति, बोद्धव्यश्च देवता।

यद्यपि सूक्तोऽयमगस्त्यदृष्ट एव, परमिन्द्रोऽत्रागस्त्येन वक्ता कल्पितः। इन्द्रमुखेन यद् वाचितम्–द्वितीयमन्त्रादिकम् तत्रार्थसंगतये इन्द्रस्य वक्‌तृत्वापरपर्यायमृषित्वमनुसन्धेयम् भवति"।

अथेयमम्भृणसुता वाड्.नाम्नी ऋषिका त्रैलोक्यव्यापिनीं वाचं नाम देवीं तस्या एव मुखेनस्तौति। तत्राम्भृण्या ऋषित्वं सदसि निवर्त्यते। देवताया एव च वाचोऽष्टर्चेन सूक्तेनात्मस्तव ऋषित्वं विवक्ष्यते। तथा वाम्भृण्या अभेदोपचारादाम्भृण्या पुनरन्यद्दषित्वमौपचारिकमापद्यात इति विशेषः।

"अत्रापि वाक्शब्दप्रतिपाद्यावर्थौ भिन्नौ। अम्भृणस्य ऋषेर्दुहिता वाड्.नाम्नी मनुष्यरुपा वक्त्री ऋषिका"।

जगदुपादानभूताऽव्ययपुरुषकला ब्रह्मस्परुपान्तः प्रविष्टा तु वाक्प्रतिपाद्या देवता। परमक्ऋषिणा वाक् देवतारुपया वाचा आत्मनो अभेदं साक्षात्कृत्य ब्रवीति इति मन्त्रेषु अहं शब्देन देवतारुपा वागेव गृह्यते। अभेदोपचाराच्च अम्मृणसुताया वाच एव ऋषित्वं व्यवह्रियते"।

तद्यथा

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा।।

[ऋ0 सं0 10 म0 125 सू0 1 भ]

अहं सूक्तस्य द्रष्ट्री वाक्, आम्भृणी, यद् ब्रह्म जगत्कारणं –तद्रूपा भवन्ती, रुद्रेभिः

रुद्रैरेकादशभिः तदात्मना चरामि। एवं वसुभिरित्यादौ तत्रवात्मना चरामीति योज्यम् । एवं च मित्रावरुणेत्यत्र उभा उभावहमेव ब्रह्मीभूता, बिभर्मि धारयामि। उभा उभावाश्विनावहमेव धारयामि। मयि सर्वं जगत् शुक्तौ रजतमिवाऽध्यस्तं सद् दृश्यते। माया च जगदाकारेण विवर्तते। तादृश्या मायया आधारत्वेन असंगस्यापि ब्रह्मणः उक्तस्य सर्वस्योपपत्तिः इत्यादि।

तदेतेषु सन्दर्भेषु ऋषिदेवतादीनामस्मच्छब्दवाच्यता सिद्धयति।

"इति शुभं भवतु"

वैदिकवाड्.मये रुद्रः

डा0 मुहम्मद इसराइल खाँ

रुद्रेको वैदिको देवः। ऋग्वेदे चत्वारि सन्ति रुद्रसूक्तानि। एकस्मिन् सूक्ते अंशतो रुद्रवर्णनमस्ति। अन्येषु अनेकेषु सूक्तेषु मंत्रेषु च रुद्रस्य गौणवर्णनम्, यतो हि तत्र स अन्यैः देवैः सह स्तुतोऽप्राधान्येन। ऋग्वेदे प्रायो देवानां त्रिणिरुपाणि सन्ति– आधिभौतिकम् , आधिदैवतम् , आध्यात्मिकंच। आधिभौतिकरुपेण रुद्रो वायोः प्रतिनिधित्वं करोति। आचार्येण यास्केन रुद्रस्य निर्वचनमेवं कृतम् –

"रुद्रो रौतीति सतः, रोरुयमाणो द्रवतीति वा, रोदयतेर्वा, "यदरुदत्तद्रुद्रस्य रुद्रत्वम्" इति काठकम् , "यदरोदीत्तद् रुद्रस्य रुद्रत्वम्" इति हारिद्रविकम् । अत्र त्रिधा रुद्रस्य निरुक्तिः– (1) रौति इति सतो रुद्रः, यतो हि स शब्दं करोति, अत एव "रु" धातुना "रक" प्रत्ययेन तुगागमेन च रुद्रः सम्भवति। रोरूयमाणो द्रवति, अर्थात् वायुः शब्दं कुर्वाणो द्रवति (गच्छति), अत एव "रु" "द्रु" इति द्वयोर्धात्वोः रुद्रो भवति। रोदयतेः वा रुद्रः, इत्यत्र स शत्रून् रोदयति, अतएव रुद्रः। अत्र ण्यन्त "रुदिर्" अश्रुविमोचने रक् प्रत्ययेन रुद्रशब्दो जायते। रोदिति इति रुद्रः, रुद्रोऽरुदत् अतएव तद् रुद्रस्य रुद्रत्वम् । कठशाखा अत्र प्रमाणम् :

"स किल पितरं प्रजापतिमिषुणा विध्यन्तमनुशोचन् अरुदत् तद् रुद्रस्य रुद्रत्वम् ।

सरमोनियरविलिपमो रुद्रस्यं विभिन्नान् अर्थान् करोति"

Crying, howling, roaring, dreadful, terrific, terrible, horrible 2"

वस्तुतो रुद्रस्तद्वायोः प्रतिनिधित्वं करोति, यो मेघं गर्जयति। तस्य मरुतां सम्बन्धो वर्तते, अतएव अनेन सम्बन्धेन रुद्रस्य मेघगर्जनरुपत्वं स्पष्टीभवति। अतोऽस्मात्परं रुद्रः प्राणानाम् अपानानांच प्रतिनिधित्वं करोति, अतएव वायुना सह मिलित्वा पंच प्राणाः पंचापाना एकादशरुद्रा भवन्ति। वायुरुद्ररित्यस्मिन् ऋग्वेदस्यास्ति एको मंत्रो य एवम् –

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ।

अषाढाय संहमानाय वेधसे तिग्मायुधाय भरता श्रृणोतु नः।।3

अग्निरपि रुद्रः। तस्यैषा–

1. निरुक्तम् 10|।–3
2. Sir Moneer Williams, A Sanskrit English Dictionary, Delhi, 1974, p. 883
3. ऋग्वेद 7|46|1

जरा–बोध तद् विविड्ढि विशे विशे यज्ञियाय।

स्तोमं रुद्राय दृशीकम् ।।4

अत्रेदं कथितं यदग्ने! तां स्तुतिं त्वं निबोध, मनुष्याणां कृते यज्ञकर्म कुरु च।

ऋग्वेदे रुद्राय–रुद्र, रुद्रः, रुद्रम् , रुद्रवर्तनी, रुद्रस्य, रुद्राः, रुद्राणाम्, रुद्रात् , रुद्रान्, रुद्रासः, रुद्रियम् , रुद्रियाः, रुद्रियाणाम् , रुद्रेभिः, रुद्रैः, रुद्रौ, इत्यादिनां शब्दानां प्रयोगो वर्तते। विद्वद्भिः रुद्रस्य विभिन्नो Sर्थः कृते यस्य संक्षिप्तं रुपम् अद्यः प्रदर्शितम् । ऋग्वेदभाष्यये प्रदर्शितम् –

1. रुद्रस्य कालात्मकस्य परमेश्वरस्य। (ऋ0 6 |28 |7)

2. रुद्राय क्रूराय अग्नये। (ऋ0 1 |27 |10)

3. रुत् दुःखं तद्धेतुभूतं पापं वा। तस्य द्रावपितारौ रुद्रौ। संग्रामे भयंकरं शब्दयन्तौ वा।। (ऋ0 1 |158 |1)

4. रुद्राणां ––––––प्राणरुपेण वर्तमानानां मरुतां।

यद्वा। रदेयितृणां प्राणानां। प्राणा हि शरीरान्निर्गताःसन्तो बन्धुजनान् रोदयन्ति।। (ऋ0 1 |101 |7)

5. रुद्राणां रोदनकारिणां शूरभटानां वर्तनिर्मार्गो घाटीः रुपो यमोस्तौ रुद्रवर्तनी। (ऋ0 1 |3 |3)

6. रोदयन्ति शत्रूनिति रुद्राः । (ऋ0 3 |32 |3)

7. रुद्रौ संग्रामे रुदन्तौ। (ऋ0 8 |26 |5)

8. हे रुद्र। ज्वरादिरोगस्य प्रेक्षणेन संहर्तर्देव। (ऋ0 1 |169 |1)

9. रुद्रियं सुखं। (ऋ0 2 |11 |3)

10. रुद्रियं रुद्रसंबंधि भेषजं। (ऋ0 1 |43 |2)

अथर्ववेद–भाष्ये रुद्रस्य रुपम् एवम् –

1. रोदयति सर्वं अन्तकाल इति रुद्रः संहर्ता देवः। (अथर्व. 1 |19 |3)

2. रौति शब्दायते तारकं ब्रह्म उपदिशतीति रुद्रः।

तथा च जाबालिश्रुतिः। अत्र हि जन्तोः

प्राणेषूत्क्रामत्सु रुद्रस्तारकंब्रह्म व्याचष्टे।। (जाबा0 उ0 1)

(अथर्व0 2 |27 |6)

3. तस्मै जगत्स्रष्ट्रे सर्वं जगदनुप्रविष्टाय रुद्राय। (अथर्व0 7 |92 |1)

4. रुत् दुःखं दुःख हेतुर्वा तस्य द्रावको देवो रुद्रः परमेश्वरः।

(अथर्व0 11 |2 |3)

5. सर्वप्राणिनो मामनिष्ट्वा विनश्यन्ति इति स्वयं रौति रुद्रः। (अथर्व0 18 |1 |40)

---

4. तदेव 1|27|10

6. स्व सेवकानां दुःखस्य द्रावकत्वं (रुद्रस्य)। (अथर्व0 18 ।1 ।40)

7. रुद्रस्य हिसंकस्य देवस्य। (अथर्व0 6 ।59 ।3)

8. रुद्रः रोदयिता शूलाभिमानी देवः। (अथर्व0 6 ।90 ।1)

9. रोदयति उपतापेन अश्रूणि मोचयति इति रुद्रो ज्वराभिमानी देवः।

(अथर्व0 6 ।20 ।2)

10. रुद्राः रोदयितारः अन्तरिक्षस्थानीया देवाः (अथर्व0 19 ।11 ।4)

श्रीमहीधराचार्यधृतं रुद्रसंबंधि–मतम् एवमस्ति–

1. रुद्रस्य शिवस्य। (वा0 यजु0 भाष्य 16 ।50)

2. रुद्राय शंकराय। (य0 16 ।48)

3. रुत् दुःखं द्रावयति रुद्रः।

खणं रुत् ज्ञानं राति ददाति।

पापिनो नरान् दुःखभोगेन रोदयति। (य0 16 ।1)

4. रोदयति विरोधिनां शतं इति रुद्रः। (य0 3 ।57)

5. रुद्रैः धीरैः बुद्धिमद्‌भिः। (य0 11 ।55)

6. रुद्रैः स्तोतृभिः। (य0 38 ।16)

7. रुद्रवर्तनी रुग्णावर्तनी भिषजौ अश्विनौ। (य0 19 ।82)

8. कदन्नभक्षणे चौर्ये वा प्रवर्त्य,

रोगमुत्पाद्य, जनान् घ्नन्ति तेभ्यः

पृथ्वीस्थेभ्यो अन्नायुधेभ्यो रुद्रेभ्यः।'(य0 16 ।66)

स्वामिदयानन्दसरस्वतीकृतं मतमेवम् । स ऋग्वेदे प्रतिपादयति –"रुद्राय परमेश्वराय जीवाय वा।।–––––।। रुद्रशब्देन भयोऽर्था गृह्यन्ते। परमेश्वरो जीवो वायुश्चेति। तत्र परमेश्वरः सर्वज्ञतया येन यादृशं पापकर्म कृतं तत्फलदानेन रोदयिताऽस्ति। जीवः खलु यदा मरणसमये शरीरं जहाति पापफलं च भुंक्ते तदा स्वयं रोदिति। वायुश्च शूलादिपीडाकर्मणा कर्मनिमित्तः सन् रोदयितास्ति। अत एते रुद्रा विज्ञेयाः। (ऋग्वेदेः 1 ।43 ।1) मन्त्रानुसारं कतिपय अर्था अधोलिखिताः सन्ति तस्य दयानन्दस्य अनुसारेण–

1. रुद्रः दुःखनिवारकः। (ऋ0 2 ।33 ।7)

2. रुद्रः दुष्टदण्डकः। (ऋ0 5 ।51 ।13)

3. रुद्रः सर्वरोगदोषनिवारकः। (ऋ0 2 ।33 ।2)

4. रुद्रः रोगाणां प्रलयकृत् । (ऋ0 2/33/3)

5. रुद्रः कुपथ्यकारिणां रोदयिता। (ऋ0 2/33/4)

6. रुद्रस्य प्राणस्य वर्तनिः मार्गः ययोस्तौ रुद्रवर्तनी।

(ऋ0 1/3/3)

7. रुद्रं शत्रुरोद्धारं। (ऋ0 1/114/4)

8. रुद्रः अधीतविद्यः। (ऋ0 1/114/11)

9. रुद्राय सभाध्यक्षाय। (ऋ0 1/114/6)

10. रुद्रः न्यायाधीशः। (ऋ0 1/114/2)

तेन दयानन्देन यजुर्वेदभाष्ये रुद्रसम्बन्धे इदं कथितम् –

1. रुद्रः परमेश्वरः। चतुश्चत्वारिशंद्वर्षकृतब्रह्मचर्यो विद्वान् वा।

(यजु0 4/20)

2. रुद्रः जीवः। (य0 8/58)

3. रुद्राः एकादशप्राणाः। (य0 2/5)

4. रुद्राः प्राणारुपा वायवः। (य0 11/54)

5. रुद्राः बलवन्तो वायवः। (य0 15/11)

6. रुद्रा मध्यस्थाः। (य0 12/44)

7. रुद्रा रुद्रसंज्ञका विद्वान्सः। (य0 11/58)

8. रुद्रः राजवैद्यः। (य0 16/49)

9. रुद्रस्य समेशस्य। (य0 16/50)

ब्राह्मण ग्रंथेषु रुद्रस्य विभिन्नं रुपं प्रदर्शितम् । तद् यथा– "अग्निर्वै रुद्रः" (श.ब्रा. 5/3/1/10), ता. ब्रा. 1/1/5/8–9): "रौद्रा वै पशवः" (श0 ब्रा0 6/3/2/7): "रौद्री वै गौ" (तै0 ब्रा0 5/2/4/13): "यद् रुद्रश्चन्द्रमास्तेन" (कौ0 ब्रा0 6/7): "धीरो वै रुद्रः" (कौ0 ब्रा0 16/7): " ऐषा (उदीची) वै रुद्रस्य दिक् " (तै0 ब्रा0 1/7/8/6): "प्राणाः वै रुद्रा इति। प्राणाः हीदं सर्वं रोदयन्ति (जै0 उ0 ब्रा. (4/2/6) कतमे रुद्रा इति) दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदस्मान् मर्त्याच्छरीरादुत्क्रामन्त्यथ रोदयन्ति तद् यद् रोदयन्ति तस्माद् रुद्रा इति। (श0 ब्रा0 11/6/3/7): "त्रिष्टुब् रुद्राणां पत्नी" (गो0 ब्रा0 2/2/9): "वसवो वै रुद्रा आदित्याः संस्रावभागाः" (तै0 ब्रा0 3/3/9/7)।

इत्थं सर्वप्रथमं रुद्रो वायोः बोधक आसीत् । इदं प्रतिभाति यद् वायुर्जीवनाय एकंआवश्यकंतत्वम् । शनैः शनैः तस्य तादात्म्यं प्राणेन प्राणौ जातम् । अतस्माद्धेतोः "प्राणा वै रुद्राः" इति प्रसिद्धिबर्भू व। वायुर्मध्यमस्थानीयः, अतएव रुद्रो माध्यमिकः स्मृतः। वायुः आ सर्वत्र चरति, अतएव स भूमावपि तिष्ठति। दिवि सूर्यस्तिष्ठति। इदं कथ्यते यद् वायुस्तं प्रेरयति चालयति च। यदा वायुः मेघं गर्जयति, तदा पर्जन्यो जलं वर्षति। अथ च जलैरन्नानि प्राद् र्भवन्ति। अथर्ववेदस्यैकस्मिन् मन्त्रे प्रतिपादितम् अस्ति, यद् रुद्रस्य सर्वत्र प्रवेशो वर्तते। स अग्नौ तिष्ठति। अस्ति तस्य स्थितिर्जले। ओषधिसु वनस्पतिसु च तस्य निवासः–

यो अग्नौ रुद्रो यो अप्स्वन्तर्य ओषधीर्वीरुध आविवेश। य इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्राय नमोस्त्वग्नये।5

अत्र सर्वव्यापकत्वेन रुद्रदेवस्याध्यात्मिकं

रुपं प्रस्फुटति। अन्यत्र कथितं यद्, रुद्रो जगतः पिता-

भुनवस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ।

बृहन्तमृष्वमजरं सुषुम्नमृधग्धुवेम कविनेषितासः।।6

अत्र रुद्रो देवो महान् ज्ञानी अजरोऽमरः सुविचारी च कथितः। इमे ते गुणाः सन्ति ये केवलं परमात्मनि भवन्ति। इमे गुणास्तं रुद्रं परमात्मपदं नयन्ति। परमात्मनः पुराणं शाश्वतंच कथितम् । स एको भवति न द्वितीयः। रुद्रस्य विषयेऽपि एवं कथितम् -

एको रुद्रो न द्वितीयाय तस्मै य इमाल्लोकानीशत ईशनीभिः।। (अथर्व-शिर. 5)

रुद्रमेकत्वमाहुः शाश्वतं वै पुराणाम् ।। (अथर्व-शिर. 5)

उपनिषत्सु आध्यात्मिकी विद्या परां कोटिं प्राप्ता। अत्र आध्यात्मिकतत्तत्स्य सम्यग् विवेचनमस्ति। श्वेताश्वतरोपनिषद् स्पष्टतः रुद्रं परमात्मानं मन्यते-

एको ह रुद्रो न द्वितीयाय तस्थुर्य इमाल्लोकानीशत ईशनीभिः। प्रत्यङ्. जनास्तिष्ठति संचुकोचान्तकाले संसृज्य विश्वो भुवनानि गोपाः।।7

रुद्रः एकोऽस्ति न द्वितीयः। स लोकान् उत्पादयति। स भुवनं प्रतिपालयति। अनते (प्रलयकाले) सर्वाणि/वस्तूनि/स्वात्मानि संकोचयति, अत एव स प्रभुरस्ति, परमात्मा चास्ति, इत्यस्मिन् विषये नास्ति संदेहलवः।

।। इति।।

वैदिकयज्ञसंस्थाया आध्यात्मिकं स्वरूपम्

प्रो0 युगलकिशोरमिश्रः

वेदो हि नाम प्राणिनां कृते साक्षाद्भगवद्विग्रह एव वर्तते। श्रीमद्भागवते भगवता श्रीकृष्णेन उक्तम् –

अहं वै सर्वभूतानि भूतात्मा भूतभावनः।

शाब्दं ब्रह्म परं ब्रह्म ममोभे शाश्वती तनूः।।

अत्र शब्दब्रह्मात्मकस्य वेदस्य भगवद्विग्रहवत्त्वं साक्षादुपदिष्टम्। अतः वेदस्याध्ययनमध्यापनं यजनं वा भगवदुपासनैव वर्त्तते, इत्यत्र नास्तिसन्देहलेशावसरः। श्रीमद्भगवद्गीतायामपि ईश्वरतत्त्वस्य वेदवेद्यत्वं स्पष्टतया इत्थमुक्तम् –

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।

वेदैश्च सर्वैरहमेववेद्यो वेदान्तकृद्वेदविदेव चाहम् ।।1

यदि मानवो वेदशास्त्रविमुखो भवति तर्हि तस्य भगवदनुग्रहपात्रता नश्यति एवंच संसारे यत्किमपि कर्म सः करोति तत्सर्वं व्यर्थमेव भवति। अतएवोक्तमेकस्मिन्मन्त्रवर्णे–

यस्तित्याज सखिविदं सखायं न तस्य वाच्यपि भागोऽस्ति।

यदीं श्रृणोत्यलकं श्रृणोति न हि प्रवेद सुकृतस्य पन्थाम् ।। 2 इति।

अयम्भावः– यः– मनुष्यः सखायं–मित्रवन्महदुपकारकं पालकञ्च वेदं तित्याज–तत्याज, तस्य अस्मिन्संसारे कुत्रापि भागो नास्ति। किम्बहुना, वाचि अपि भागो नास्ति।

एवंविधो वेदविरहितो मनुजः संसारेऽस्मिन् यत्किमपि श्रणोति कुरुते वा तत्सर्वं अलीकं व्यर्थमेव भवति। यतो हि सः कल्याणस्य पन्थां=मार्गं न वेद=न जानाति।

अतः साक्षादीश्वरविग्रहभूतस्य शब्दब्रह्मात्मकस्य वेदस्याराधनं महते श्रेयसे कल्पते। भगवतः स्मरणं, कीर्त्तनं, अर्चनं यथा ऐहिकामुष्मिकं फलं यच्छति, तथैव वेदस्याध्ययनं यजनमपि ऐहिकामुष्मिकफलसाधकं भवति। अतएव सायणाचार्येण वेदलक्षणं विदधता प्रतिपादितम्– "इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद" इति। 3 एवंच सति वैदिकं कर्म न केवलमैहिकफलसाधकमपितु आमुष्मिकं मोक्षादिसाधकञ्च विद्यते।

---

1. गीता 15/15 2. ऋ0 सं0 १/71/7

3. तै0 सं0 भा0 भू. पृ.2

श्रेयः साधनीभूता भगवत्प्रतीतिरुपा बुद्धिः यथाऽऽनेकजन्मार्जित पुण्येन भवति तथैव वैदिकधर्ममार्गपरतापि पूर्वजन्मार्जितपुण्यपुंजेनैव भवति। श्रीशङ्कराचार्येण विवेकचूडामणिमानके ग्रन्थे समुक्तम्–

जन्तूनां नरजन्मदुर्लभमतो पुंस्त्वं ततो विप्रता ।

तस्माद् वैदिकधर्ममार्गपरता विद्वत्वमस्मात्परम् ।।

अतो भगवदनुग्रहेण प्राप्तस्य मनुष्यजीवनस्य सार्थक्यं वैदिकधर्मानुष्ठानेन सम्पादनीयं सर्वैः इत्यस्ति आचार्याणां सदुपदेशः। कोऽयं वैदिको धर्मः येन श्रेयस्सिद्ध्येतेति जिज्ञासायां पूर्वमीमांसाग्रन्थेषु लक्षितम् – "वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म" इति। स च यागादिः। अतः यागादिरेव धर्मः।1

वाधूलस्मृतौ वैदिककर्मणामनुष्ठानं नितान्तमावश्यकमिति प्रतिपादयता विहितम् –

श्रुतिस्मृति ममैवाज्ञे यस्ते उल्लङ्घ्य वर्तते।

आज्ञाच्छेदी ममद्वेषी मद्भक्तोऽपि न वैष्णवः।।

मानवः जीवने प्रतिक्षणं मनसा, वाचा, कायेन वा यत्किमपि कर्म कुर्वन्नास्ते। तत्कर्म यदि शास्त्रानुमोदितं भवति तर्हि कल्याणाय कल्पते अन्यथा दुःखभाग्भवति। अतएवोक्तंश्रुतौ– "क्रतुमयोऽयं पुरुषः। स यत्क्रतुर्भ वति तत्कर्म कुरुते, यत्कर्म कुरुते तदभिसम्पद्यते।" इति।

अनेन श्रुतिवाक्येन मानवाः शास्त्रानुमोदितयज्ञादि सत्कर्मसम्पादने भृशंमवबोधिताः।

यज्ञस्याध्यात्मिक पक्षयुक्तत्वम्

वेदानां परमं प्रयोजनमध्यात्ममेव। अतः निखिलेऽपि भारतीये वाङ्मये अध्यात्मविद्यायाः गुणकीर्त्तनं समुपलभ्यते। अध्यात्ममार्गे चित्तस्य शिवसंकल्पयुक्तत्वं चित्तवृत्तीनां निरोधपुरस्सरमैकाग्रंच नितरां समपेक्षितं भवति। संसारेऽस्मिन् नास्ति एतादृक् किमपि व्यावहारिकं पारमार्थिकं वा कार्यं यच्चित्तैकाग्रतां विना सिद्ध्येत। चित्त चांचल्यं विकासक्रमस्यावरोधको भवति। चित्रैकाग्र्यं तु विनाशमपि विकासे परिणमयति। अस्माकमृषिभिः मुनिभिश्च याः याः उपलब्धयः समासादितास्ताः सर्वा अपि चित्तवृत्तिनिरोधेनैव। साम्प्रतिके युगेऽपि नव–नवाः वैज्ञानिका आविष्काराः वैज्ञानिकानां सर्वात्मभावेन एकाग्रताया एव परिणामभूताः सन्ति। अतः जीवनस्य प्रत्येकस्मिन्क्षेत्रे सफलतायै एकाग्रताया अध्यात्मयोगस्य शरणमनिवार्यमेव।

प्रत्यभीष्टसिद्ध्यर्थं वेदेषु "धर्मं चर" इति वाक्येन धर्मानुष्ठानस्योपदेशः कृतो वर्तते। सोऽयमनुष्ठेयधर्मस्त्रिविधः। यथोक्तंभगवता श्रीकृष्णेन गीतायाम् –

"यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्"।2

अर्थात् यज्ञः, दानम् तप, इत्येते मनीषिणां कृते पावयितारः। अत्र यज्ञः प्रथमत्वेन परिगणित इति यज्ञस्यमाहात्म्यं सर्वानतिशेते। इदमत्रावधेयम्भवति यत् अध्यात्मलाभाय चित्तवृत्तिनिरोधः परमावश्यको विद्यते। चित्तवृत्तिनिरोधार्थ साधनचतुष्टयं– मन्त्रयोग– हठयोग– लययोग– राजयोगनामभिः ऋषिभिर्मुनिभिश्च प्रवर्तितम् । इमाः चतस्रोऽपि प्रक्रियाः यज्ञसंस्थायामेकत्र समाहिताः दृश्यन्ते। अतः यज्ञविद्या अध्यात्मस्यमूलमिति सिद्ध्यति। तद्यथा–

1. अर्थसंग्रहः पृ.2

2. गीता 18/15

(1) परिदृश्यमाणस्यास्य सृष्टिप्रपंचस्य कोऽपि भागः नामरूपाभ्याम् अव्यवच्छिन्नो नास्ति। जीवः नामरुपात्मकेनावरणेनोपहितः सन् बद्धो भवति। यः यस्मिन्नाधारे पतति स तस्यावलम्बने नैव उत्तिष्ठति, नाकाशं गृहीत्वा। अतश्च संसारसागरे पतितोः जीवः विष्णु–रुद्र–इन्द्रादिनामरुपात्मकेनावलम्बनेनैव मुक्तिमार्गमधिगन्तुं शक्नुयात् , नान्येन पथा। एवंच सति दिव्यनामालम्बाश्रयाणामिन्द्राग्निविष्णुप्रभृतीनां देवानां यज्ञमाध्यमेन यजनेन मन्त्रोच्चारणपुरस्सरं स्मरणश्रवणानुकीर्त्तनेन च चित्तवृत्तिनिरोधपूर्वकं देवतलभावनं सम्भवति। फलतः चित्तवृत्तिनिरोधात्मिकाः समस्ताः क्रियाः मन्त्रयोगान्तर्गताः सन्ति। मन्त्रयोगोऽयं साक्षाद्रूपेण यज्ञभावित एव वर्तते।

(2) स्थूलशरीरेण सम्बद्धानां षट्कर्मादियोगक्रियाणाम् अभ्यासेन स्थूलशरीरवशीकरणपुरस्सरं चित्तवृत्तिनिरोधात्मिकाः सर्वा अपि क्रियाः "हठयोग" इति नाम्ना व्यपदिश्यन्ते। यज्ञसंस्थासु– ब्रह्मचर्यम् , इन्द्रियनिग्रहः, दीक्षाविधौ शरीरावयवानां संयमनम् , वाग्यमः, पयोव्रतम् , सत्यवदनम् , इत्याद्याः क्रियाः बाह्याभ्यन्तरेण स्थूलशरीराधिकरणपूर्वकं चित्तवृत्तिनिरोधस्य विशिष्टोपायभूता एव वर्तन्ते। अतः "हठयोगस्य" परिपालनं यज्ञसंस्थायां स्वाभाविकतया समुपलभ्यते।

(3) समष्टि–व्यष्टिसिद्धान्तानुसारं जीवशरीरात्मके पिण्डे समष्टिसृष्टिरुपात्मके ब्रह्माण्डे च साम्यमस्ति। अतः पिण्डेऽपि ब्रह्माण्डगतानां तत्त्वानां सूक्ष्मरुपेणावस्थितिर्विद्यते। पिण्डे (=जीवशरीरे) स्थितं ब्रह्माण्डव्यापिप्रकृतिशक्तिकेन्द्रं विराट् पुरुषस्य (=परमात्मनः) ज्योतिस्तत्त्वे लयात्मिकायाः क्रियाशैल्याः तदनुरोधिनां क्रिया व्यापाराणंच "लययोग" इति नाम्ना व्यवहारः शास्त्रचिन्तकैः कृतः। यज्ञविधौ जीवः स्वात्मनिस्थितां चिच्छक्तिं यज्ञसंस्थामाध्यमेन विराड्ज्योतिः स्वरुपे मण्डलपुरुषे भावयति। अतः "लययोगः" यज्ञेषु अन्तर्भुक्त एव। वैदिके पुरुषसूक्ते अन्येषु च मन्त्रेषु "लययोगस्य" महत्वं तत्साधनंच बहुधा संकेतितमस्ति।

(4) शास्त्रेषु मनसो वृत्तयः बन्धस्य कारणं बुद्धिवृत्तयश्च मोक्षस्येति प्रतिपादितम् । मोक्षसाधने सहयुक्तायः बुद्धिक्रियाया एव मूर्त्तरुपभूताः "विचाराः" सहायकाः भवन्ति। सद्विचारपुरस्सरमनुष्ठीयमानायाः चित्तवृत्तिनिरोधक्रियाया एव नामान्तरं विद्यते "राजयोग" इति। सोऽयं "राजयोगः" यज्ञसंस्थासु सत्यवदन–ऋतसंसाधन–अपरिग्रह– दानादिभिः पदार्थेषु देवत्वभावनादिविचारपूर्वकमनुष्ठीयमान चित्तवृत्तिनिरोधात्मकतया संलक्ष्यते स्फीतेन विधिना।

एवम्प्रकारेण मन्त्रयोग–हठयोग–लययोग–राजयोगरूपायाः चतुर्विधप्रक्रियायाः यज्ञविधिषु सातिशयेन सन्निहितत्वात् यज्ञानामाध्यात्मिकत्वं निर्विवादमेव।

किंचास्माकं सनातने वैदिकधर्मे सृष्टितादात्म्यभावे कश्चन विशेषः आग्रहो वर्तते। वैदिकधर्मस्य समेऽपि अनुष्ठानविधयः तादात्म्यसम्पादनसाधनभूताः सन्ति। यज्ञः, उपासना–विधिश्चास्य बाह्याभ्यन्तरपक्षौ स्तः। यज्ञस्य मूलमस्ति ममत्वभावनायास्त्यागः, यः खलु अध्यात्ममार्गस्य प्रमुखं साधनमस्ति। यज्ञेषु मन्त्राणां प्रयोगस्यानिवार्यत्वं साधितं शास्त्रकृद् भिः। एतेनेदं सिद्धं भवति यत् यज्ञे मननसाधनात्मिकायाः वाच एवोपयोगो भवति। यतोहि मन्त्रशब्दस्य "मननात् मन्त्रः" इति व्युत्पत्या मननसाधनभूताः मन्त्राः इत्यर्थः प्राप्यते। मन्त्रमाध्यमेन शुद्धान्तःकरणे यो भावः समुदेति स एव यज्ञियोभावः तस्यैव च परिणतिः अध्यात्मरुपेण भवति। एवं हि यज्ञः व्यक्ताव्यक्तयोस्संयोजकः, विद्या ऽऽविद्ययोः, अग्नीषोमयोः, देवमनुष्ययोश्च कश्चनापूर्वसड्.कल्पात्मकः संयोजको विद्यते। यज्ञः भौतिकद्रव्याणामग्नौप्रक्षेपाड्.गमात्रमेव नास्ति अपितु यजमानः आत्मन अर्पणमेव तत्र भावयति। एवं बाह्याभ्यन्तरसत्तयोस्तादात्म्यभावना यज्ञेषु विधीयते। यज्ञमाध्यमेन मनुष्यः विनयस्य, अकिंचनतायाः, परार्थतायाश्च

अभ्यासं समनुतिष्ठति अथ च स्वात्मनि कंचनाभिनवमापूरणात्मकं विश्वासं अहर्निशं श्रेयसे सम्पूरयति। भगवता श्रीकृष्णेन गीतायां यज्ञस्याध्यात्मिकं स्वरुपमुपदिशतोक्तम् –

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।

ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ।।[1]

अर्थात् मनुजः देवभावनया (" अगन्म ज्योतिरुत्तमम् " इत्यनया वैदिक्याभावनया) भावितः सन् अर्पयति, यद्धविः अर्पयति तदपि अग्नीषोमात्मकमेव, यत्राग्नौ जुहोति तदपि ब्रह्मैव, यस्मै दैवतायै च जुहोति सा ब्रह्मरुपिण्यैव। एवंच अर्पणात्मकंयज्ञकर्म ब्रह्मैव वर्तते।

यज्ञसंस्थायाः रहस्यविषये ब्राह्मणारण्यकोपनिषद्ग्रन्थेषु बहुधा चर्चितमस्ति। दर्शपूर्णमासप्रकरणे आधानिसिद्धस्याग्नेः ब्रह्मरुपता इत्थं निरुपिता–

"स आर्षेयमुक्त्वाऽऽह ब्रह्मण्वदिति। ब्रह्मह्यग्निस्तस्मादाह ब्रह्मण्वदिति।"[2]

एवमेव चातुर्मास्यमधिकृत्य श्रूयते–

"अक्षय्यं ह वै सुकृतं चातुर्म्मास्ययाजिनो भवति। संवत्सरं हि जयति, तेनास्याक्षय्यं भवति, तं वै त्रेधा विभज्य यजति, त्रेधा विभज्य प्रजयति सर्व्वं वै संवत्सरः सर्व्वं वा अक्षय्यमेतेन।[3] स यद्वैश्वदेवेन यजते। अग्निरेव तर्हि भवति, अग्नेरेव सायुज्यं सलोकतां जयत्यथ यद् वरुणप्रधासैर्यजते वरुण एव तर्हि भवति वरुणस्यैव सायुज्यं सलोकतां जयत्यथ यत्साकमेधैर्यजत इन्द्र एव तर्हि भवति इन्द्रस्यैव सायुज्यं सलोकतां जयति।––

स परमेव स्थानं परमां गतिं गच्छति चातुर्मास्ययाजी तदाहुर्न्न चातुर्मास्ययाजिनमनुविन्दन्ति परमं ह्येव खलु स स्थानं परमां गतिं गच्छतीति।"[4]

शतपथब्राह्मणे यज्ञशरीरावमयत्वेन प्रणीतादीनामनुष्ठेयपदार्थानामधियज्ञमध्यात्मंच सम्पत्तिः प्रदर्शिता। तद्यथा– आहवनीयस्योत्तरतः स्थापि.. या प्रणीताख्या आपस्ता यज्ञस्य शिर एव। ताभिर्यज्ञस्य शिरः संस्क्रियते। एवमधियज्ञं शिरः सम्पत्तिं प्रदर्श्याध्यात्ममपि सा प्रदर्श्यते। अर्थात् प्रणीतानां प्रणयनेन यजमानो यद् यज्ञस्य शिरः संस्करोति तद् यज्ञसम्बन्धिशिरो मदीयमेव शिर इति विजानीयात् ।

अत्र यज्ञे यज्ञसम्बन्धी यः पंचदशदार्वात्मक इध्मः स देहमध्ये संचरन् प्राणवायुरेव। अर्थादत्रेध्मे प्राणबुद्धिः कार्या। यतोहि यथा इध्मेन अग्निः समिध्यते तथा प्राणवायुना सर्वं शरीरजालं प्रदीप्तं भवति। तथाहि यच्च प्राणभृत् निमीलनव्यापारं कुर्वत् पशुपक्षिमनुष्यादिजङ्गमशरीरम्, यच्च एजत् निमेषणादि व्यापारशून्यं केवलं कम्पमानमेव स्थावरशरीरम्, तच्चान्तः संचरता प्राणवायुनैवेद्धम् । इत्थमधियज्ञमग्न्यादि समिन्धकस्य इध्मस्य अध्यात्मं प्राणरुपतां विद्याद् यजमानः अहमेवैष इध्म इति।

अस्य यज्ञस्य सामिधेन्याख्या या ऋचः ता अनूकं शिरः पक्षपुच्छाद्यवयवसन्धिं विद्याद् यजमानः। तासां सामिधेनीनां विषये यजमान इत्थं यज्ञे ब्रूते– "सन्तन्वन्निव मेऽनुब्रूहिं" इति। अर्थात् ताः सामिधेनीः परस्परं संयोजयन्निव मह्यमनुब्रूहि। यतोहि मध्यावयव सन्धिरुपमिदं शरीरं परस्परसंयुक्तं दृश्यते, तस्मादनूकरूपाणां सामिधेनीनामपि

1- गीता 4/24

2- श0 ब्रा0 1.5.1.7

3- श0 ब्रा0 2.6.3.1

4- श0 ब्रा0 2.6.4.8

परस्परंसंसक्तत्वं युक्तम् । तदुक्तमाश्वलायनेन– "स्वरादिमृगन्तमोड्.कारंत्रिमात्रं मकारान्तं कृत्वोत्तरस्या अर्द्धर्चे ऽवस्येत्, तत् सन्ततम् " इति।

किंच यज्ञस्येमावाधारौ मनोवाग्रूपौ वेदितव्यौ। तावेव मनोवाग्रूपावाधारौ क्रमेण सरस्वत् सरस्वत्यात्मकौ ज्ञेयौ। मम मनश्च वाक् च सरस्वत्–सरस्वतीरुपावाधारौ इति जानीयात् इत्यर्थः। अस्ययज्ञस्यावयवाः पंच प्रयाजाः एवाध्यात्मं पंच शीर्षण्याः प्राणाः। तत्र मुखमेव प्रथमः प्रमाजः, दक्षिणा नासिका द्वितीयः प्रयाजः, वामा नासिका तृतीयः प्रयाजः, दक्षिणः कर्णश्चतुर्थः प्रयाजः, वामश्च कर्णः पंचमः प्रयाजः। यस्माच्चतुर्थे प्रयाजे उपभृतिवर्तमानस्याज्यस्यार्धं जुह्वामानयति, तस्मादिदं श्रोत्रं मध्ये सच्छिद्रम् । या च यज्ञे सौम्याग्नेयाज्यभागौ, एतावध्यात्मं मे चक्षुषी इति विद्यात् । पूर्णमासयागे य आग्नेयः पुरोडाशः अयमेव यज्ञशरीरस्य दक्षिणः पार्श्वः। सोऽध्यात्मं मे शरीरस्य दक्षिणः पार्श्वभागः। उपांशुयाजाख्यश्च यागो हृदयमिति विद्यात् । यदुपांशु तेन चरति तदुपांशुयाजात्मकं हृदयं गुहेव अलक्ष्यं भवति। अथ अग्नीषोमीयदेवताको यस्तृतीयो यागोऽस्ति सोऽस्य पुरुषस्य उत्तरार्धभागः। इत्थं पूर्णमासयागे वेदितव्यम् ।

दर्शयागे तु इन्द्रदेवताकं सान्नाय्यं दधिपयोलक्षणं हविस्तदेव देहस्योत्तरभागः। अंसमध्यमेव स्विष्टकृद्यागः। शत्रुरेव प्राशित्रम् । यथा प्रजापति शरीरे आविद्धं शल्यं प्राशित्रावदानेन निरगमयन् देवास्तथा यज्ञशरीरस्य यजमानस्य वा वेष्टनशीलं यत्पापं यच्चग्रन्थिमद्भुतं वस्तु, यच्च वरुणसम्बन्धिहिंसनं तत्प्राशित्रावदानेन निस्सारयति।

अधियज्ञं या इडा सैवाध्यात्ममुदरम् । तस्माद् यथा इडायां पुरोडाशादीनि सान्नाय्यादीनि वा हवींषि सहावद्यन्ति तथैवेदं नानारुपमन्नं उदरे सहैव धार्यते।

ये यज्ञशरीरावयवरुपास्त्रयोऽनुयाजास्त एवाध्यात्मं नाभिवायु गुह्यरुपास्त्रयोऽवांचः प्राणाः। यज्ञे "इदं द्यावापृथिवीभद्रमभूत्" इत्यादिरूपः सूक्तवाकः "तच्छंयोरावृणीमहे" इति शंयुवाकश्च पुरुषेऽध्यात्मं बाहुद्वयम् । यज्ञे सोमत्वष्ट्देवपत्न्यग्नि गृहपतिदेवताकाश्चत्वारः पत्नीसंयाजा एव अस्य यज्ञशरीरस्य चतस्रः प्रतिष्ठाभूताः। यज्ञे समिष्टयजुराख्यो होम एवाध्यात्मं पदद्वयम् । एवं शिरः प्रभृति पादान्ता अवयवा अधियज्ञमध्यात्मं चाहुतिभिरेव परिकल्पिताः सन्तः सम्भूय एकविंशतिसंख्याकाः। ताश्चैकविंशतिराहुतयः– द्वावाधारौ, पंचप्रयाजाः, द्वावाज्यभागौ, आग्नेयः पुरोडाशः, अग्नीषोमीय उपांशुयाजः, अग्नीषोमीयः पुरोडाशः, अग्निः स्विष्टकृत् इडा, त्रयोऽनुयाजाः, सुक्तवाकश्च शंयोर्वाकस्व, संस्रवाहुतिः, समिष्टयजुश्चेति।1

एवमुपर्युक्ता एकविंशतिराहुतयो यज्ञे भवन्ति, अधिदैवतमपि एवमेव एकविंशतिराहुतयः। ताश्च द्वादशमासाः संवत्सरस्य, वसन्ताद्याः पंचर्तवो ("हेमन्तशिशिरयोः समासेन" इति वचनात् हेमन्तशिशिरयोरेकतुर्त्वात्), पृथिव्यादयस्त्रयोलोकाः इति सम्भूय विशंतिराहुतयः। एकविंशश्च दिवि प्रतपन् सूर्यः। एष सूर्य एव गतिः गन्तव्यस्थानंच। एष एव च प्रतिष्ठा। एवमेकविंशतिमाहुतीर्जानन् पुरुषः एतां गतिं प्रतिष्ठां च विन्दति। अतएवारुणिराह– "अर्धमासे–अर्धमासे खलु आदित्येन समानलोको भवामि यतोऽहं दर्शपूर्णमासयोः उक्तां सम्पत्तिं वेद्मि।

1. उपरि विवृतं यज्ञस्याधियज्ञमध्यात्मंचरहस्यं शतपथब्राह्मणस्य एकादशकाण्डमनुशील्य प्रस्तुतम् वर्तते।

यो यज्ञविद्यायाः आध्यात्मिकं रहस्यं जानाति स (आत्मयाजी) देवयाज्यपेक्षया महत्तरं फलं साधयति। स एव खलु आत्मयाजी यो यजमानः "इदं शिरः प्रभृतिकं मदीयमङ्.गमनेन यागाङ्.गेन संस्क्रियते, इदं मदीयमङ्.गमनेन उपस्थाप्यते"– इति जानाति। एतत्फलंच सर्वपापक्षयः। यथा सर्पस्त्वचो विनिर्मुच्यात् एवमात्मयाजी अस्मात् मरणधर्मकात् शरीरात्पाप्मनो विनिर्मुक्तो भवति। ततश्च ऋङ्.मयो यजुर्मय साममय आहुतिमयश्च सन् स्वर्गं लोकं प्राप्नोति।

अथ स देवयाजी भवति यो "देवानेवाहमिदं यजे देवान्वा प्रजयामि" इति जानाति। तत्फलंच यथा खलु पानीयान् हीनः पुरुषः श्रेयसे श्रेष्ठाय पुरुषाय शोभनमुपायनमुपहरेत् , यथा वा वैशो राज्ञे करं दद्यात् , एवं स देवयाजी हविषा तोषितैर्देवैः सेवानुसारेण दत्तं फलं लभते। किन्तु यावन्तं लोकमात्मयाजी जयति तावन्तं लोकं नायं जयति, न लभते, उपासनाज्ञानहीनत्वात् इतिशम् ।

वेदेषु प्रकृतिचित्रणस्य सौन्दर्यम्

डा० रामनाथ वेदालङ्.कारः

वेदाः खलु धर्मग्रन्था वा स्युरध्यात्मग्रन्था वा स्युर्विविधविद्यानां निधिग्रन्था वा स्युः, निर्विवादमिदं यत् तेषां विषयप्रतिपादनशैली काव्यमयी वर्तते। वेदेषु स्तुतिर्वास्यात् , प्रार्थना वा स्याद् , उपसना वा स्याद् , गभीरं दार्शनिकं विवेचनं वा स्याद् , मानवस्य कर्तव्यबोधनं वा स्याद् , उद्बोधनं वा स्यात् , सत्कार्यस्य प्रशंसा वा स्याद् , दुष्कार्यस्य निन्दा वा स्यात् , पापं प्रत्याक्रोशो वा स्याद् , युद्धस्य भीषणः संहारो वा स्याद् , विजयदुन्दुभेर्नादो वा स्यात् , स्वराज्यस्यार्चना वा स्यात् , पर्जन्यस्यामृतवर्षणं वा स्याद् , विद्युद्गर्जनायाः विद्युद्दीप्तेश्च ताण्डवनर्तनं वा स्यात् , सरितां कलकलनिनादो वा स्याद् , वातस्य झंझाप्रवाहो वा स्यात् , खगानां कलकूजनं वा स्यात् , सघनवनानां हरीतिमा वा स्यात् , सरसशान्तेर्गीतं वा स्याद् , विकटक्रान्तेरुद्घोषो वा स्यात् , पवित्रस्य यज्ञस्य सन्देशो वा स्याद् , अग्निज्वालानामूर्ध्वगमनं वा स्यात् , सोमरसस्य प्रसवणं वा स्यात् – सर्वत्र काव्यमयी शैली दरीदृश्यते।

लघुलेखेऽस्मिन् वेदानां कतिपयानि प्रकृतिचित्रणानि प्रदर्श्य प्रतिपादयितुमीहामहे वयं यत्तैः प्रकृतिचित्रणैर्वेदाः कं सन्देशं मुखरयन्ति। कस्यापि काव्यस्य प्रकृतिचित्रणं चित्रणमात्रं चेत्, ततः पाठकैः कोऽपि सन्देशो न प्राप्यते चेद् , जागरुकता न लभ्यते चेत् , तद् हृत्तन्त्र्याः तारान् न झङ्.कारयति चेद् , हृदि दिव्यचेतनां न प्रवाहयति चेत् , तर्हि तच्चित्रणं कामं कियदपि मंजुलं भवेत् तस्य न किमपि मूल्यम् ।

अरण्यवर्णनम्

प्रकृतिचित्रणप्रसङ्.गे प्रथमं तावद् वयमरण्यवर्णनस्य सूक्तमेकम् (ऋ० 10.146) गृह्णीमः। अत्र कस्याश्चिद् वनवासिन्या एकस्य नागरिकस्य च मध्ये वार्ता वर्णिता। सूक्तमिदम् अरण्यानीसूक्तनाम्ना कीर्त्यते। अरण्यानीशब्दस्यार्थं विशदयन् निरुक्तकृद् यास्को ब्रूते– "अरण्यानी अरण्यस्य पत्नी" इति (निरु. 9.28.24)। अरण्यं नाम वनम् , तस्य पत्नी न भवितुमर्हति, न्श्चितनत्वात् तस्य। मुख्यार्थबाधे सति लक्षणा प्रवर्तते, अरण्यशब्दस्य लक्ष्यार्थश्च "अरण्यस्थः पुरुषः" इति सम्पद्यते। अरण्यस्थस्य पुरुषस्य "अरण्यशब्देन" कीर्तने तावदिदं स्वारस्यं यत् तस्य पुरुषस्य वनेन सहैकात्म्यं तज्जीवनस्य वनमयत्वं च व्यज्यते। तस्य अरण्यस्थस्य पुरुषस्य वानप्रस्थस्य जनस्य वा पत्नी अरण्यानी वर्तते। कश्चिन्नागरिको वनं समायातस्तां वानप्रस्थपत्नीं पृच्छति–अयि वनदेवि, किमिति त्वम् अरण्येषु विलुप्तेव तिष्ठसि? ग्रामं किं न पृच्छसि? अत्र वने किं त्वां भयं न बाधते? सा वनवासिनी समुत्तरति–

वृषारवाय वदते यदुपावति चिच्चिकः।
आघाटिभिरिव धावयन्नरण्यानिर्महीयते।। (ऋ० 10.146.2)

भद्र, त्वं भयस्य वार्ता करोषि। भयं कुतः? अत्र तु वीणां विनैव संगीतस्यानन्दः प्राप्यते। पश्य, यदा वृषारवो नाम तीव्रस्वरो जन्तुः स्वकीयेन तीव्रेण स्वरेण दिशो निनादयति, यदा च चिक्-चिक् इति मृदुध्वनिं कुर्वाणश्चिच्चिको नाम कश्चिदन्यो जन्तुस्तमुपगच्छति, तदा वनरुपो गायको वीणातन्त्रीषु "स-रे-ग-म-प-ध-नि" इति सप्तस्वरानिव शोधयति। अत्र कवेः कीदृशं कल्पनाचातुर्यम् , कीदृशश्चोत्प्रेक्षालड्.कृतिचमत्कारः, ध्वनिमात्रेण स्वार्थं पुरस्कुर्वतोः "वृषारव चिच्चिक" शब्दयोश्च कीदृशं पदौचित्यप्रावीण्यम् ।

सूक्तेऽस्मिन् षण्मन्त्राः सन्ति। परम् , एक एव मन्त्रोऽन्यो दीयते-

आंजनगन्धिं सुरभिं बह्वन्नामकृषीवलाम् ।

प्राहं मृगाणां मातरमरण्यानिमशंसिषम् ।। (ऋ0 10.146.6)

वनवासिनी देवी वनवीथ्या महिमानं गायन्ती नागरिकं जनं कथयति। पश्य, एषा वनवीथी अंजनतरुणां विकसितैः पुष्पैः सौरभमयी, कृषीवलान् विनैव प्रचुरान्नसंपदा युक्ता, विविधानां पशूनां माता च विद्यते। तामेनां को न स्तुयात् ? " बह्वन्नाम् - आकृषीवलाम् " इति कारणं विनैव कार्योत्पत्तिवर्णनादत्र विभावनालंकारसौन्दर्यं प्रस्फुटति। वनस्य स्त्रीलिड्.गे मातृरुपे वर्णनं चापि सुतरां मनोहारि। नागरिकस्य प्रश्न आसीत् - किं त्वां भयं नोद्वेजयति? वनवीथ्या मातृरुपेण चित्रणात् तस्य प्रश्नस्य स्वत एव समाधानं जायते, मातुर्भयं कः कुर्यादिति।

अरण्यश्रृंखलाया एतेन मनोमोहकेन चित्रणेन मानवः सन्देशं प्राप्नोति यत् तृतीये वयसि गृहभारं पुत्रे पुत्रबध्वां च निक्षिप्य स्वयं वानप्रस्थाश्रमं प्रविश्य वनस्यैकान्तं सुरम्यं च वातावरणमेव स्वनिवासस्थलीं कुर्यादिति।

विश्वामित्र-नदी-संवाद

सर्वान् प्रति मैत्रीभावं स्वंमनसि निदधानः ऋषिकोटिकः पुरुषो "विश्वामित्र" इति कथ्यते। "विश्वामित्रः सर्वमित्रः" इति हि निरुक्तम् (2.24)। विश्वशब्दस्य दीर्घान्तादेशे च "मित्रे चर्षौ" (पा0 6.3.130) इति पाणिनीयं सूत्रं प्रमाणम् । स विश्वामित्रः सुदासो नृपतेः पुरोहितो वर्तते। यः खलु शुभदानकर्ता स सुदाः। "सुदाः कल्याणदानः" इति तत्रैव निरुक्तम् । विश्वामित्रः शुभदानकर्तु र्नृपतेः सकाशात् शकटपूरं धनान्नवस्त्रादिकं दक्षिणायां प्राप्य स्वावासं वनप्रान्तरं प्रतिनिवर्तमानो ऽस्ति। स पश्यति यद् या नद्यो वनान्नगरं प्रति मम गमनकाले न्यूनजलत्वात् सुतरणा आसन् ता एव सम्प्रति जलपूरं प्रवहन्ति, भयड्.कर्यश्च संजाताः। नदीं विपाशं शुतुद्रीं च दृष्ट्वा विश्वामित्रस्य मनसि काव्यधारा प्रस्फ ुट्ति। विपाड् नाम विस्तीर्णधारा नदी, शुतुद्री च सा या आशुद्राविणी, यां कश्चित् प्रतोदमिव हस्ते कृत्वा वेगेन संचालयति। यथोक्तं निरुक्ते-"विपाड् विपाटनाद्वा विपाशनाद्वा विप्रापणाद् वा। शुतुद्री शु द्राविणी, आशु तुन्नेव द्रवतीति वा (निरु 0 9.24.20)।" विश्वामित्रो ब्रूते-

प्र्वतानामुशती उपस्थादश्वे इव विषिते हासमाने।

गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते।। (ऋ0 3.33.1)

एते विपाट्छुतुद्यौ नद्यौ स्वकीयं जलपूरं समादाय तेन सह वेगेन धावतः। सचेतने इव, सकामे इव एते पर्वतानां क्रोडं परित्यज्य परस्परस्या अग्रे गन्तुमिव तथा पयसा जवेते यथा धावनप्रतियोगितायां परस्परं स्पर्द्धमाने विमुक्तबन्धने द्वे घोटिके वेगेन धावतः। किंच, तटप्रान्तान् एते नद्यौ तथा लेलिहाने स्तः यथा शुभ्रे द्वे गावौ स्वीकीयौ वत्सौ जिह्या लीढः।

विपाट्छुतुद्यौ नद्यौ समाश्रित्य परस्ताद् विश्वामित्रो वर्णयति यदेते सरितौ रथारुढे इव सवेगं धावतः, ऊर्मिभिः सगलाश्लेषं सबाहुपाशबन्धनं मिलित्वा परस्परमानन्दसिक्ते इव कुरुतः (मन्त्रो द्वितीयः)। अत्र नद्योश्चेतनवद् वर्णनं कीदृशं सौन्दर्यमावहति। तत्रैव सिन्धुरपि विद्यते। सिन्धुः खलु विशिष्टप्रवाहा नदी, "सिन्धुः स्यन्दनात् (निरु0 9.24.20)"।

एतासां नदीनां विकटं संगमं वीक्ष्य विश्वामित्रस्ता ब्रूते यन्मुहूर्तं यावत् स्वकीय प्रवाहादुपरमध्वं येनाहं पारं गच्छेयम् (पंचमः मन्त्रः)। नद्यः प्रत्युत्तरन्ति–वज्रबाहुरिन्द्रः पर्वतानां हिमशिलाः संत्रोट्य संत्रोट्य मेघं विच्छिद्य विच्छिद्य वाऽस्मान् प्रवर्तयति, सुपाणिः सविता देवोऽस्मानग्रेऽग्रे प्रवाहयति। वयं तु तयोरेवानुशासने चलामः। तव वचसा कथमवरुद्धप्रवाहा भवेम् (मन्त्रः षष्ठः)। अन्ते च विश्वामित्रस्ता नदीः "स्वसारः" इति सम्बोधयति– हे स्वसारः, मदीयां प्रार्थनां यूयं शृणुत, दूरादहम् अन्नधनपूर्णं शकटं रथवाहनं च गृहीत्वा समायामि, यूयं मद्वचसा स्वप्रवाहं गाधं कुरुत, मम रथचक्रकीलादधःप्रवाहा भवत, येनाहं युष्मान् पारयेयम् इति। "स्वसारः" इति सम्बोधनं श्रुत्वा नद्यश्चमत्कृता जायन्ते, तत्क्षणमेव च भ्रात्रे विश्वामित्राय ता गाधसलिला भवन्ति। विश्वामित्रोऽनायासं तास्तरति।

अचेतनाभिर्नदीभिश्चेतनस्य मनुष्यस्य संवाद एव प्रमाणीकरोति यद् वर्णनमिदं काव्यमयं वर्तते। वर्णने च वेदस्य कविरतीव सफलो जातः। नदीनामलङ्कृतिमये वर्णने सुचारुतया सन्देशोऽयमेतेन संवादेन प्राप्यते यत् स्वसारं कृत्वा सुविशालापि विद्वेषिणी रिपुसेना स्वानुकूला कर्तुं शक्यत इति।

सिन्धोर्द्विविधं वर्णनम्

ऋग्वेदस्य (10.75 संख्यके) सूक्ते सिन्धुनद्या द्विविधं रुपमुपलभ्यते। एकं तस्या उग्रं रूपम्, द्वितीयं च सौम्यम्। पूर्वं तावदुग्रं रूपं दृश्यताम् –

दिवि स्वनो यतते भूम्योपर्यनन्तं शुष्ममुदियर्ति भानुना।
अभ्रादिव प्रस्तनयन्ति वृष्टयः सिन्धुर्यदेति वृषभो न रोरुवत् ।। (ऋ0 10.75.3)

उग्ररुपस्य वर्णनं पुंल्लिङ्गे कविना कृतम्। पश्यत, सिन्धुनदोऽयं वृषभवद् रेभमाणः प्रवहति। अस्य तीव्रो ध्वनिर्गगनमपि व्याप्नोति, भूमिमपि च। प्रदीप्ताभिः स्वकीयाभिरुर्मिभिरयमनन्तं वेगं धारयति। यदायं प्रचण्डं ध्वानमुत्थापयन् प्रवहति तदा प्रतीयते यन्मेघात् सगर्जनं वृष्टयः पतन्ति। अत्र वृषभस्योपमायां संगर्जन्तीनां वर्षाणामुत्प्रेक्षायां च या चारुताऽस्ति तां सहृदयाः पाठकाः सहजमेवानुभवितुं शक्नुवन्ति।

सिन्धोः सौम्यं रुपं वर्णयन् कविस्तां युवतिरुपेण चित्रयति–

स्वश्वा सिन्धुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती।

ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधम् ।। (ऋ0 10.75.8)

सिन्धुरुपेयं युवतिः सुरथाधिरुढा सुवासा हिरण्यालंकारधारिणी सुसज्जिता क्रियाशीला ऊर्णावस्त्रधारिणी सुशीलासुभगा चास्ति, माधुर्यवर्धकं च रुपं धारयति। अत्र नदी तीव्रप्रवाहत्वाद् रथाधिरुढा, सुन्दरवीचित्वात् सुवासाः, प्रवहत्स्वर्णिमपुष्पस्तवकत्वाद् हिरण्यालङ्कारधारिणी, प्रवहतामूर्णासदृशानां विविधवर्णानां वानस्पत्यद्रव्याणां कारणादूर्णामयी, शालीनप्रवाहत्वात् शीलवती चोक्ता। सिन्धौ युवतित्वारोपश्च चामत्कारिकः। उग्रं रुपं प्रकटयितुं नद्याः पुरुषरुपचित्रणे, सौम्यं रुपं च दर्शयितुं तस्या युवतिरुपचित्रणे च यत् स्वारस्यं तदपि सहृदयैरनुभूयतां नाम।

चित्रणमिदं पुरुषाणां कृते बलवत्तां प्रचण्डतामाक्रामकतां च, नारीणां कृते च माधुर्यं सन्दिशति।

सरस्वती

सरस्वती वेदे पारावारघ्घातिन्या रुपे, स्तन्यपायिन्या रुपे चापि वर्णिता। तद्यथा-

इयं शुष्मेभिर्बिसखा इवारुजत् सानु गिरीणां तविषेभिरुर्मिभिः।

पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमाविवासेम धीतिभिः।। (ऋ0 6.61.2)

"सर" इत्युदकनाम तद्वती एषा नदी सरस्वती बलवद्भिस्तरङ्.गैर्गिरीणां सानूनि तथा त्रोटयति यथा काचित् कन्याऽनायासं कमलनालानि त्रोटयति। अत्र स्वाभावोक्तिरलङ्.कारः, तस्य च "बिसखा इव" इत्युपमाऽङ्.गमित्यङ्.गाङ्.गीभावसंकरः।

यस्ते स्तनः शशयो यो मयोभूर्येन क्विा पुष्यसि वार्याणि।

यो रत्नधा वसुविद् यः सुदत्रः सरस्वति तमिह धातवे कः।। (ऋ0 1.164.49)

हे सरस्वति, यस्ते पयोधरः सुस्वापकः सुखप्रदश्चास्ति, येनत्वं क्विानि वार्याणि वरणीयानि बलादीनि पुष्यसि पुष्णासि, यो रत्नधा रमणीयानां रसानां धारकः, वसुविद् वसूनाम् ऐश्वर्याणां लम्भकः, सुदत्रः शोभनदानकर्ता च वर्तते, तम् इह धातवे कः तम् अस्मान् पायय। अत्र नद्याः स्तनो न भवतीत्यसम्बन्धे सम्बन्धरुपोऽतिशयोक्तिरलंकारः। अचेतनापि नदी चेतनधर्मयुता नारीति व्यज्यते।

वायोः रथः

वायो रुपद्वयं भवति-एकं तावत् प्रबलस्य झंझावातस्य रूपम्, द्वितीयं च शीतलमन्दसुगन्धिपवनस्य रूपम्। झन्झावातं वर्णयन् कविः प्राह यद् वातोऽयं रथमारुह्य सवेगं गच्छति।

वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्नस्य घोषः।

दिविस्पृग् यात्यरुणानि कृण्वन्नुतो एति पृथिव्या रेणुमस्यन्।। (ऋ0 10.168.1)

वायो रथस्य महत्त्वं पश्यत, कथमेव रुजन् प्ररुजन् प्रमृणन् वेगेन गच्छति, कथं गर्जन्नस्य घोषोऽस्ति, गगनं चुम्बन्नेष दिक्प्रान्तानरुणान् कुर्वन्, पृथिव्या धूलिमितस्ततो विकिरन् प्रद्रवति।

झंझावातस्य कीदृश्चमत्कृतिपूर्णोऽयं स्वभावोक्तिरलङ्.कारः। वायो रथारुढत्वकल्पनायामप्यद्भुतं सौष्ठवम्। एतेन वर्णनेन योगसाधकस्य प्राणायामद्वारा सकलशारीरमानस-मलध्वंससूचनामपि कविः प्रयच्छति। तत्साकमेव च मनुष्यो विपदाक्रान्तः सन् सवायुवत् सकला विध्नबाधाः प्ररुजन्, गर्जन्, शत्रुदलं धूलिसात् कुर्वन् रक्तेन च रंजयन्नग्रगामी भवेदिति सन्देशोऽपि झन्झावर्णनेनैतेन प्राप्यते।

आगामिन्येव मन्त्रे वायोः सुन्दरं सौम्यं वर्णनमपि कविर्विधत्ते। यस्यां दिशि समीरः सरति तस्यामेव दिशि स्थावरा वृक्षवनस्पत्याद्या अपि नमन्ति। नदीसमुद्रसरोवरा दीनां जलपङ्.क्तयोऽपि तस्मिन्नामिलन्ति। जलवाचकोऽप् शब्दः स्त्रीलिङ्.गो भवति, तेन कविः सूचयति यद् यथा कश्चिद् युवकः पत्नीं प्राप्नोति तथैव समीरः सलिलसंहतिरुपां सहधर्मिणीमालिङ्.गतीव। तया सहैकस्मिन् रथे समुपविशन्, वार्तालापं कुर्वन् सम्पूर्णस्य भुवनस्य राजा स पवनदेवः सानन्दं मन्दगत्या चलति-

सं प्रेरते अनु वातस्य विष्ठा ऐनं गच्छन्ति समनं न योषाः।

ताभिः सयुक् सरथं देव ईयतेऽस्य क्विस्य भुवनस्य राजा।। (ऋ0 10.168.2)

एतेन मनुष्यः सन्देशं लभते यत् स जीवने नित्यमुग्रतयैव न वर्तेत, प्रत्युत स्वकीयं मन्दस्मितमयम् , आनन्दमयम् , उल्लासदायकं, सद्व्यवहारपूर्णं मधुरं रुपमपि प्रदर्शयेदिति।

ब्राह्मणा मण्डूकाः

वर्षर्तौ जलपूर्णेषु सरस्सु मण्डूकानां "टर–टर–" शब्दोऽतीव मोददायकः प्रतिभाति। प्रकृतेः सूक्ष्मनिरीक्षकाः कथयन्ति यन्मण्डूकाः पर्जन्यं वारि याचितुमपि टरटरायन्ते, वर्षाधाराभिः संतृप्तिं प्रकटयितुं चापि। तेषामेतयोर्द्वयोरपि ध्वन्योः स्पष्टमन्तरं भवति। वेदे मण्डूकनाम्ना वेदपाठिनो ब्राह्मणा अप्यभिहिताः।

निरुक्तकृद् यास्को मण्डूकशब्दं तावदेवं निर्वक्तिमण्डूका मज्जनाद् , मदतेर्वा मोदतिकर्मणः, मन्दतेर्वा तृप्तिकर्मणः, मण्डयतेरिति वैयाकरणाः, मण्ड एषामोक इति वा (निरु0 9.5)। अस्यायमाशयः– मण्डूकशब्दः प्लवनार्थकाद् "मस्ज" धातोर्निष्पद्यते। भेकाः सरोवराणां सलिले मज्जन्ति, वेदपाठिनो वटवश्च ज्ञानरसे। यद्वा, माण्डूकशब्दो मोदनार्थकाद् "मदी" धातोः, तृप्त्यर्थकाद् "मन्द" (मदि) धातोर्वा सिध्यति। भेका वर्षासलिल प्रमुदितास्तृप्ताश्च जायन्ते, वेदपाठिनो वटवश्च विद्यावृष्टौ। यद्वा, भूषणार्थकाद् "मडि" धातोर्मण्डूकः। भेकानां चर्म–भूषितं, वेदपाठिनां बटूनां च चित्तं भूषितं भवति। यद्वा " मण्ड–ओकस् " इत्यनयोर्योगेन मण्डूकशब्दः साधनीयः। भेकानाम् ओकः सरोरुपं गृहं मण्डितं, वेदपाठिनां वटूनां च ओको विद्यागृहं भित्तिषु लिखिताभिर्ऋग्भिर्मण्डितं भवति।

ऋग्वेदस्य (7.103 संख्यके) सूक्ते मण्डूकशब्देन भेकानां वेदपाठिनां ब्राह्मणानां च युगपद् रम्यं चित्रणं कृतम् । एष चास्ति तत्सूक्तस्य प्रथमो मन्त्रः–

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः।
वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः।।

अत्र वर्षास्वानन्दमग्नानां शब्दायमानानां भेकानां वर्णने "ब्राह्मणा व्रतचारिणः" इत्यत्र लुप्तोपमा। "अपि वोपमार्थे स्याद् ब्राह्मण इव व्रतचारिणः" इति हि निरुक्तम् (9.5.3)। ये भेकाः संवत्सरं यावद् भूम्या अभ्यन्तरं तथैव सुप्ता आसन् यथा व्रतचारिणो ब्राह्मणाः समाधौ निद्रितास्तिष्ठन्ति, त एव वर्षाकाले सम्प्राप्ते पर्जन्यतर्पितां वाचमुच्चारयितुमारब्धवन्तः। "ब्राह्मणा व्रतचारिणः" इत्यत्र व्यङ्ग्योत्प्रेक्षापि संभवति। भेकाः संवत्सरं यावद् भूमौ सुप्ता आसन्, यथा ते व्रतचारिणो ब्राह्मणा एव स्युः, यतो व्रतचारिणो ब्राह्मणा एव समाधिमास्थाय सुदीर्घमवधिं यावत् शयितुं शक्नुवन्ति।

मन्त्र एष वेदपाठिनो ब्राह्मणानधिकृत्यापि तादृशमेव रमणीयमर्थं प्रस्तौति। तत्पक्षे "मण्डूकाः" इत्यत्र लुप्तोपमाऽङ्गीकार्या। मौनव्रतचारिणो ब्राह्मणाः, ये संवत्सरं यावत् तपोनिरता आसन् , सम्प्रति मण्डूका इव पर्जन्यतर्पितां वाचमुदीरयन्ति, मौनभङ्गं विधाय सस्वरवेदपाठे निरता जाता इत्यर्थः। निरुक्ते ब्राह्मणपक्षीयोऽर्थोऽपि संङ्केतित एव –"संवत्सरं शिशयाना ब्राह्मणा व्रतचारिणोऽब्रुवाणाः" इति।

सकलेऽपि सूक्ते भेकानां वेदपाठिनां ब्राह्मणानां च सुरम्यं चित्रणमस्ति, किन्त्वत्रैक एव मन्त्रोऽपरो व्याख्यायते–

गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषाम् ।
समानं नाम बिभ्रतो विरुपाः पुरुत्रा वाचं पिपिशुर्वदन्तः।। (ऋ0 1.103.6)

वर्णासंतृप्ता एते भेका यदा शब्दायन्ते तदा कश्चिद् गोवद् वाचमुदीरयति, कश्चिच्च छागवत् । एषु भेकेषु

कश्चित् पृश्निवर्णोऽस्ति, कश्चिच्च हरितवर्णः। विविधरुपा अप्येते "मण्डूकाः" इति समानं नाम बिभ्रति, चतुर्दिक्षु च स्वकीयां वाचं प्रसारयन्ति।

मन्त्रो वेदपाठिपक्षेऽपि योज्यताम् । एषु वेदपाठिषु ब्राह्मणेषु कश्चिद् 'गोमायुः'गोशब्दमुपजीव्य शोधपरः, कश्चिद् "अजमायुः" अजशब्दमुपजीव्य शोधकर्ता वर्तते। एषु कश्चित् पृश्निः सूर्यवर्णो गौरोऽस्ति, कश्चिच्च हरितः श्यामवर्णः। "विरुपाः" विभिन्नगुणा अप्येते "मण्डूकाः" इति समानेन नाम्ना व्यवाह्रियन्ते, वेदपाठं कुर्वन्तश्च सर्वत्र स्वकीयां सस्वरां वेदवाचं ध्वनयन्ति। अत्र श्लेषालङ्.कार विच्छित्तिरपि दर्शनीया।

स्पष्टमेव वैदिकं वर्णनमिदं काव्यमयभाषायां मण्डूकवदुत्साहेन वेदपाठं वेदाध्ययनं वेदानुसन्धानं च कर्तुं सन्देशं मुखरयति।

चिरयुवतिः उषाः

उषसः ऋग्वेदीये काव्यमये चित्रणे सहृदयाः काव्यमर्मज्ञा मुग्धाः सन्ति। सा दिवः पुत्री, चिरयुवतिः, सुन्दरी च वर्णिता। उषा रात्रिश्च गौरकृष्णवर्णे भगिन्यौ स्तः, ये परस्परस्या अनन्तरं गमनागमने कुरुतः।

एषा दिवोदुहिता प्रत्यदर्शि व्युच्छन्ती युवतिः शुक्रवासाः।

विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ।। (ऋ0 1.113.7)

पश्यत, इयं द्युलोकस्य पुत्री, शुभ्रवसना युवतिरुषा आविर्भवन्ती प्राच्यां दिशि परिदृश्यते। एषा सकलस्य पार्थिवस्य धनस्याधिष्ठात्री वर्तते। अयि सौभाग्यमयि उषः, प्रत्यहं त्वमेवमेवाऽऽविर्भव।

उदीर्ध्वं जीवो असुर्न आगादय प्रागात् तम आ ज्योतिरेति।

आरैक् पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः।। (ऋ0 1.113.16)

उद्बुध्यध्वं भ्रातरः, जीवनदायी प्राणोऽस्मान् प्राप्तः। निविडोऽन्धकारोऽपगतः, ज्योतिरुद्गच्छति। उषा देवी सूर्यस्य यात्रायै मार्गं रिक्तं कृतवती। वयं च तां स्थितिं प्राप्ता यत्र जना ज्योतिरात्मसात्कृत्य दीर्घजीविनो जायन्ते ।

एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ।

ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ।। (ऋ0 1.124.3)

अवलोकयत, इयं ज्योतिर्वसाना दिवो दुहिता मनस्विनी देवी उषाः संमुखमाविर्भवति। एषा सत्यस्यैव मार्गमनुसरति। एषा प्रज्ञानवती काचिद् रमणीव मर्यादा नोल्लङ्.घयति।

उषसश्चित्रणान्येतानि समाजे नार्याः कृते विशेषसन्देशवाहकानि। उषसां मुखेन कविः समाजे नारीणामुज्ज्वलवेशभूषां, धनवत्तां, मनस्वितां, ज्ञानवत्तां, परिवारात् समाजाच्च तामसिकतामपसार्य ज्ञानस्य सदाचारस्य च ज्योतिषः प्रदीप्तिं, मर्यादापालनमित्यादीनि कर्तव्यानि सूचयति ।

सूर्योदयमुपजीव्यैका कल्पना

ऋग्वेदे सूर्योदयं समाश्रित्यैका चमत्कारिणी कल्पना कृता। रात्रिस्तमसाऽऽच्छन्ना विद्यते, सूर्यकिरणाः सूर्यमण्डले पिहिताः सन्ति। ते कथं सहेरन् यत् सत्स्वस्मासु भूतलमन्धकारमग्नं तिष्ठेत् । सुपर्णाः प्रियमेधाः किरणरुपा ऋषयः सूर्यं याचन्ते यद् भवता वयं कारागार इव स्वमण्डले बद्धाः कृताः, येन प्रकाशवन्तोऽपि वयं भूमण्डलं प्रकाशयितुं न क्षमाः। कृपया बन्धनादस्मान् मुंचतु भवान्, येनास्मद्द्वारा भूतलस्यान्धकारोऽपगच्छेत् , सर्वेषां प्राणिनां चक्षूंषि च प्रकाशेन पूर्णानि भवेयुः।

वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।

अप ध्वान्तमूर्णुहि पूर्द्धि चक्षुर्मुमुग्ध्यस्मान् निधयेव बद्धान् ।। (ऋ0 10.73.11)

मन्त्रेऽस्मिन् " निधयेव बद्धान् " इत्यत्रोत्प्रेक्षालङ्.कारस्य, किरणेषु ऋषित्वारोपे च रूपकालङ्.कारस्य चमत्कारो दर्शनीयः। किरणेषु चेतनत्वमारोप्य तन्मुखाद् बन्धनमुक्तिप्रार्थनायामपि कियत् स्वारस्यमस्ति।

वर्णनमिदं समासोक्त्या गुरुकुलस्य छात्रेष्वपि घटते। ते विद्यामधीत्य मेधाविनः ऋषयः संजाताः, तथाप्याचार्यस्तान् समावर्त्य स्नातकान् न करोति। ते सुपर्णाः सन्ति, कमपि विषयमुपजीव्य कल्पनारूपैः पक्षैरुच्चैरुत्पतितुं क्षमन्ते। ते आचार्यमुपसृत्य निवेदयन्ति- भगवन् , त्वया कृपया वयं विद्वांसः कृताः, तथापि किमिति जालेनाबद्धा इव रक्षिताः, कृपां कुरु, अस्मान् बन्धनादुन्मुच्य स्नातकान् विधेहि, येन वयं जगति व्याप्तमज्ञानान्धकारमपसारयेम त्वत्कीर्तिं च विस्तारयेम।

सूर्यवर्णनम्

ऋग्वेदे सूर्यस्य वर्णनमतीव स्वभावोक्तिचमत्कारपूर्णं विलोक्यते। किंचित् सौन्दर्यं नयनगोचरीक्रियताम् ।

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।

आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च।। (ऋ0 1.115.1)

पश्यत, प्रकाशकानां सूर्यरश्मीनामद्भुतं चित्रविचित्रं च सैन्यमुद्गच्छति यन्मित्रस्य वायोः, वरुणस्य जलस्य, अग्नेः वह्नेश्च चक्षुः प्रकाशकं वर्तते। एतेन सूर्येण द्यौर्भूतलमन्तरिक्षं च रश्मिभिः परिपूर्णं कृतम् । सूर्योऽयं जङ्.गमस्य स्थावरस्य च जगतो जीवनाधारो जातः।

दिवो रुक्म उरुचक्षा उदेति दूरे अर्थस्तरणिर्भ्राजमानः।

नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि।। (ऋ0 7.63.4)

"दिवो देव्याः स्वर्णभूषणम् , आकाशपारावारस्य नौका, दीप्यमानो विस्तीर्णनेत्रोऽयं सूर्यः प्राच्यामुदयते, सुदूरेऽस्य लक्ष्यं वर्तते। मन्ये, अनेन भ्राजमानेन सूर्येण प्रेरिता मानवाः स्वस्वोद्देश्यपूर्तौ संलग्नाः सन्तः कर्माणि कुर्वन्त आसते।" अत्र सूर्ये स्वर्णालङ्.कारत्वस्य प्रातरारभ्य सांयपर्यन्तमाकाशसागरे तरन्त्या नौकायाश्चारोपः कियत् काव्यमयः।

रात्रिदेव्या आगमनम्

उषसो वर्णनं यथा वेदेषु युवतिरुपेण कृतं तथैव रात्रिरपि वेदकाव्ये युवतिरेव। तदाविर्भावस्य सुरम्यं वर्णनं कुर्वन् वैदिककविरूद्रगिरति-

आ प्रागाद् भद्रा युवतिरह्नः केतून्त्समीर्त्सति।

अभूद् भद्रा निवेशनी विश्वस्य जगतो रात्री।। (साम0 608)

विलोकयत, एषा रात्रिरुपा युवतिरागतास्ति। दिने सर्वत्र विकीर्णान्सूर्यरश्मीन् संहरति। भद्रा रात्रियुवतिरियं समस्तस्य भुवनस्य विश्रामदायिनी संजाता। रात्रियुवत्याश्चित्रणमेतन्नार्याः कर्तव्यमुपदिशति यत्सापि दिने प्राङ्.गणे विकीर्णानि वस्तून्युत्थापयेद्, दिवसे क्रियमाणानि कार्याणि चोपसंहरेत् , विश्रामदायिनी च स्यात् ।

कृष्णा गौरी च द्वे भगिन्यौ

रात्र्युषसौ द्वे भगिन्यौ स्तः, तयोः प्रथमा कृष्णा द्वितीया च गौरी। उभयोर्यात्रामार्गः समान एव, स च निःसीम आकाशः। परमात्मदेवेन सूर्यदेवेन वाऽनुशिष्टे ते परस्परानन्तरं समागम्य गगनमार्गे विचरतः। ते न कदाचित् विरमतो न चान्योन्यं हिंस्तः, प्रत्युत प्रेमाबद्धे समनस्के ते अहोरात्रं संचालयितुं विहरतः।

समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे।

न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरुपे।। (ऋ0 1.113.3)

अत्र रात्र्युषसोः स्वसृत्वारोपः कीदृश्श्चमत्कृतिपूर्णः। परिवारेऽपि स्वसृभ्यां तथैव प्रेम्णा वर्तितव्यमिति सन्देश एतेन काव्येन प्राप्यते।

पृथिवी

विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।

वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु।। (अथर्व0 12.1.6)

विश्वं स्वक्रोडे बिभर्तीति विश्वम्भरा, वसुधात्री, प्रतिष्ठा सर्वेषामाधारभूता, हिरण्यवक्षाः हिरण्यं वक्षसि गर्भे यस्याः सा, जगतः चेतनाचेतनरुपस्य संसारस्य निवेशनी वासयित्री, वैश्वानरं सर्वजगद्धितकरम् अग्निं बिभ्रती धारयन्ती, इन्द्रऋषभा सूर्यपतिका भूमिर्नोऽस्मान् द्रविणे सकले धनधान्यादिरुपे वसुनि दधातु प्रतिष्ठापयतु। अत्र समासोक्त्यावक्षसि हिरण्यालङ्.कारधारिणी, परिवारे सर्वेषां धारयित्री, धनान्नादिस्वामिनी, पुत्रपौत्रादीनां वासयित्री, आहिताग्निका, श्रेष्ठपतिका काचिन्नारी व्यज्यते।

शन्तिवा सुरभिः स्योना कीलालोध्नी पयस्वती।

भूमिरधि ब्रवीतु मे पृथिवी पयसा सह।। (अथर्व0 12.1.59)

अत्र पृथिवीचित्रणे समासोक्त्या घटोध्नी स्वपयसा तर्पयन्ती काचिद् धेनुरप्रस्तुता व्यज्यते। यद्वा, "सुरभिः, पयस्वती" इत्यनयोः पदयोरेकतरस्य धेनुवाचकत्वेऽभिमते सति पृथिव्यां धेनुत्वारोपे रुपकालङ्.कारविच्छित्तिः।

अधस्तनेष्वपि मन्त्रेषु पृथिवीचित्रणचारुता चेतो हरति–

यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।

सा नो भूमिर्भूरिधारा पयो दुहामयो उक्षतु वर्चसा।।

विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम् ।

शिवां स्योनामनुचरेम विश्वहा।।

यां द्विपादः पक्षिणः संपतन्ति हंसाः सुपर्णाः शकुना वयांसि।

यस्यां वातो मातरिश्वेयते रजांसि कृण्वंश्च्यावयंश्च वृक्षान् ।

वातस्य प्रवामुपवामनु वात्यर्चिः।। (अथर्व0 12.1.9,17,51)

द्यावापृथिव्यौ

भूरि द्वे अचरन्ती चरन्तं पद्वन्तं गर्भमपदी दधाते ।

नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ।। (ऋ0 1.185.2)

अपदी पादरहिते अतएव अचरन्ती अचलन्त्यौ अपि एते द्वे द्यावापृथिव्यौ पद्वन्तं पादैर्युक्तं चरन्तं चलनशक्तियुक्तंच गर्भं गर्भस्थं शिशुं दधाते धारयत इत्याश्चर्यकरमिदम् । पित्रोः मातापित्रोः उपस्थे क्रीडे विद्यमानं नित्यं न सूनुं ध्रुवं पुत्रमिव विद्यमानमेनं पश्यत। एष पादवान् रश्मिरुपचरणवान् , चरन् प्राच्याकाशात् प्रतीच्याकाशं यावद् यात्रां कुर्वन् शिशुः सूर्यः खलु यं पादरहितौ अचलन्त्यौ द्यावापृथिवीरुपौ मातापितरौ जनयतः। अत्र कार्यगुणानां कारणगुणविरोधित्वाद् विषमालङ्.कारचारुत्वं सुधियो विभावयन्तु नाम।

पर्जन्यस्य स्वभावोक्तिः

ऋग्वेदे पर्जन्यदेवताकस्य (5.83) सूक्तस्य पर्जन्यविषयिण्यः स्वभावोक्तयोऽपि चेतोहराः सन्ति।

रथीव कशयाऽश्वाँ अभिक्षिपन्नाविर्दूतान् कृणुते वर्ष्याँ अह।

दूरात् सिंहस्य स्तनथा उदीरते यत् पर्जन्यः कृणुते वर्ष्यं नभः।। (ऋ0 5.83.3)

यथा सारथिः प्रतोदेन रथस्य धुरि नियुक्तान् अश्वानगन्तुं प्रेरयति तथैव पर्जन्यो वृष्टिसूचकान् पवनदूतान् प्रेरयति। यदा पर्जन्यो गगनं वृष्ट्युन्मुखं कर्तुं गर्जति तदा प्रतिपक्षिगर्जनमिव मन्यमानः केसरी गर्जनेनैव तत् प्रत्युत्तरति। अत्र प्रथमचरणस्योपमा स्वभावोक्तेरलङ्.कारस्याङ्.गभूता सती चमत्कृतिमुत्पादयति।

प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः।

इरा विश्वस्मै भुवनाय जायते यत् पर्जन्यः पृथिवीं रेतसावति।। (ऋ0 5.83.4)

वाताश्चलन्ति, तडितस्तडतडायन्ते, ओषधयो वर्धन्ते, गगनं वर्षति, सर्वेभ्यो भूतेभ्योऽन्नमुपजायते, यदा पर्जन्यः स्वकीयेन वृष्टिरसेन भुवं तर्पयति। अनुप्रासपरिपुष्टेयं स्वभावोक्तिरपि विशेषरमणीया।

सोमसूर्यरूपौ शिशू

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम् ।

विश्वान्यन्यो भुवनाभिचष्टे ऋतूँरन्यो विदधज्जायते पुनः ।। (ऋ0 10.85.18)

दृक्पातं कुरुत, द्वौ शिशू इमौ माययाऽन्योन्यमनुसरन्तौ, क्रीडां कुर्वन्तौ यज्ञं परियातः। अनयोरेकः सर्वाणि भुवनानि प्रकाशयति, अन्यतरस्च ऋतून् निर्मिमाणो मृत्वाऽपि पुनः पुनर्जन्म गृह्णाति।

स्पष्टमेव शिशू इमौ सूर्याचन्द्रमसौ स्तः। एतौ अहोरात्ररूपं यज्ञं संचालयतः। शिशुः सूर्यो मंगलबुधबृहस्पत्यादीन् लोकान् प्रकाशयति, चन्द्रमाश्चामावस्यायां मृत्वापि प्रतिपदि विकलाङ.गरुपेण जन्म गृहीत्वा क्रमेण वृद्धिं गच्छन् पूर्णिमायां पूर्णाङ्.गो जायते।

अत्र चन्द्रमसं सूर्यं च शिशुं कथयन् कविस्तस्या अतिशयोक्तेः सौन्दर्यमुत्थापयति यस्यामुपमेयमुपमानेन निगीर्यते। यद्वा, सोमार्कदेवताकत्वादृचोऽस्याः सोमे सूर्ये च शिशुत्वमारोपयन् कविः रुपकालङ्.कारच्छटां वितनुते। यद्वा, ऋचमेनां प्रहेलिकां मत्वा प्रहेलिकालङ्.कारविच्छित्तिरत्र द्रष्टुं शक्यते।

दिवः शिशुश्चन्द्रः

प्रत्यहं नूतनं नूतनं कलेवरमास्थाय प्रादुर्भवन्तं चन्द्रसं कविरेवं वर्णयति–

नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ।

भागं देवेभ्यो विदधास्यायन् प्र चन्द्रमस्तिरसे दीर्घमायुः ।। (अथर्व0 14.1.24)

मदजनकश्चन्द्रिकारसप्रदो दिवः शिशुरिन्दुश्चेतनाचेतनात्मकं जगत् प्रमोदयन्नन्तरिक्षे भासमानस्तिष्ठति, सहसैव स मेघखण्डेनान्तर्हितः। एतद् दृष्ट्वा कविर्वर्णयति–

एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः।

य इन्दुर्वारमाविशत् ।। (ऋ0 9.38.5)

गगनं तमोभिर्व्याप्तं वर्तते। अत्रान्तर एवोदीयमानश्चन्द्रः कृष्णवर्णानि तमांसि विच्छिद्य शुक्रं ज्योतिः सर्वत्र प्रकाशयति। तदित्थं चित्रयति कविः–

पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत् ।

कृष्णा तमांसि जङ्घनत् ।।

(ऋ0 9.66.24)

मरुतां काव्यमयं वर्णनम्

अधिदैवतदृष्ट्या मरुतो वेदे वृष्टेरानेतारः पवनाः सन्ति। ते विद्युतोऽट्टहासादिव जाता इति वेदस्य कविरुत्प्रेक्षते। मेघदूतनाम्नि खण्डकाव्ये कविः कालिदासः कैलासं वर्णयन्नाह यद् गिरिरयं शिवस्य निवासस्थानम्, शिवश्चात्र प्रत्यहमट्टहासं कुरूते। हासस्य च वर्णः कविसम्प्रदाये धवलो मन्यते। अतः कल्प्यते यद् हिमधवलः कैलासोऽयं पुंजीभूतः शिवस्याट्टहास एवास्ति–

शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं, राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः (पूर्वमेघः, 58)।

अस्याः सौष्ठवमय्याः कालिदासकल्पनांया मूलं वेद एव प्रतीयते।

हस्काराद् विद्युतस्पर्यतो जाता अवन्तु नः।

मरुतो मृडयन्तु न. ।। (ऋ0 1.23.12)

मरुतां वर्णनप्रसङ्गे उपमालङ्कारसङ्कीर्णा स्वभावोक्तिरपि दर्शनीया–

वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति।

यदेषां वृष्टिरसर्जि।।

दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन।

यत् पृथिवीं व्युन्दन्ति।। (ऋ0 1.38.8,9)

यदा मरुद्भिरुत्पादिता वृष्टिर्भवति तदा रम्भायमाणा गौरिव विद्युद् गर्जति, धेनुश्च यथा वत्सं प्राप्नोति तथा वृष्टिर्भूतलमागच्छति। मरुत इमे यदा जलवाहकेन पर्जन्येन भूमिं क्लेदयन्ति तदा दिवसेऽप्यन्धकारं जनयन्ति।

मरुतां वर्णनमिदं मानवान् सन्दिशति यत् तेऽपि जगत्यानन्दस्य वृष्टिं कुर्युर्नतु कलहस्य, विद्वेषस्य, दुःखस्य वा।

एवमस्माभिरत्र वैदिकसंहितासु चित्रितानां केषांचित् प्रकृतिचित्रणानां चित्रं प्रस्तुतम् , मानवेभ्यश्च ततः कः सन्देशः प्राप्यत इत्यपि दृष्टम् । मन्यामहे यत् सहृदयाः पाठका नूनमेभिर्वर्णनैश्चमत्कृतिमनुभूय वेदानां काव्यमयतां हृदि निधास्यन्तीति।

वेदे राष्ट्रियभावना सांमनस्यंच

मानसिंहः

वैदिके युगे समाजस्य राजनीतिकविकासस्य कुल–ग्राम–विड्–जन–जनपदानीति पंच घटकतत्वान्यासन् । कुलमित्यासीत् सामाजिकसंघटनस्य मूलं घटकतत्वम् , तस्य चाधिपतिः पिता ज्येष्ठभ्राता वा "कुलप" इत्युच्यते स्म। अविभक्तः परिवार एव कुलमासीत् । विविधानां कुलानां समवायो ग्राम इत्यभिधीयते स्म, तस्य प्रमुखश्च ग्रामणीरिति कथ्यते स्म। ग्रामीणजनतायाः रक्षणं, तस्याः संघटनं, ग्रामेषु शान्तिस्थापनं व्यवस्था चेत्यादीनि तस्य प्रमुखकर्त्तव्यान्यासन् । एतेषु कर्मसु तस्य साहाय्यं ग्रामसभाभिर्विधीयते स्म। ग्रामणीद्वारेणैव राजा जनसम्पर्कं व्यधत्त। अनेकग्रामसमूहो विश्पदेन व्यवह्रियते स्म, तस्याधीश्वरो विश्पतिरिति भण्यते स्म। विशो ग्रामाणां मिथः सम्बन्धानां व्यवस्थैव तस्य प्रमुखं कार्यं वर्तते स्म। विभिन्नानां विशां समुदायो जन इति पदवाच्य आसीत् , यस्य गोप्ता रक्षको वा राजासीत् । राज्ञ आधिपत्ये जना यस्मिन् देश–विदेशे न्यवसन् स जनपदाभिधान आसीत्, "ऐतरेय–ब्राह्मणे" (8.14) जनपदशब्दो देशार्थे प्रयुक्तः। जनपदस्य राष्ट्रमित्यप्यपरमभिधानमासीत् । वैदिके युगे भारतं विविधेषु जनपदेषु राष्ट्रेषु वा विभक्तमासीत् ।तानि च विविधराजशासितान्यासन् । अनु–यदु–पूरु–कुरु–द्रुह्यु–तृत्सु–काशी–विदेह–तुर्वश–मत्स्य–पंचाल– मूजबदू–गान्धारप्रभृतीन्येवं विधान्येव जनपदान्यासन् ।

राष्ट्रपदमृग्वेदे[1], यजुर्वेदीयायां वाजसनेयिसंहितायां[2] तैत्तिरीयसंहितायां [3], मैत्रायणीयसंहितायां [4] चाथर्ववेदेऽपि [5] च प्रयुक्तम् । ऋग्वेदे "राष्ट्री[6]" मैत्रायणीयसंहितायांच "राष्ट्रियम् [7]" इति च पदे समुपलभ्येते। अतो वैदिके काले राष्ट्रावधारणा सुस्थिरा जातेति सिद्ध्यति निश्चप्रचम् ।

राष्ट्रं प्रजाभिर्निर्मीयत इति धारणा बद्धमूलासीद् वैदिके जनमानसे। एतस्मादेवैतरेयब्राह्मण–(8.26) मुच्चैरुद्घोषयति "राष्ट्राणि वै विश" इति। एतस्मादेव च हेतोरापस्तम्ब बौधायनकात्यायनाः स्वकीयेषु श्रौत–सूत्रेषु विश् शब्दं राष्ट्रार्थे प्रयुक्तवन्तः। राष्ट्रस्यावधारणया सहैव तस्य निर्माणहेतुभूतायाः प्रजाया अपि महत्वोदयः स्वाभाविक एवासीत् । यास्कीये निरूक्ते (7.5) " नरराष्ट्रम् " इति पदमपीदमेव प्रमाणयति। अस्यां स्थितौ प्रजानां हृदयेषु स्वराष्ट्रभूमिमाश्रित्य गभीरभक्तिभावविकास सहज एवासीत् । कस्यापि जनसमुदायस्य स्वकीयायाः स्थिरभूमेः सद्भावः, स्वकीयदेशावस्थितिस्तदर्थंच मातृभूमिभावना, स्वदेशस्याभ्युदयाय रक्षणाय च स्वजनन्या इव रक्षणाय सततं निखिलकष्टसहिष्णुत्वं सर्वविधयत्नपरायणत्वंच सुदृढराज्यसंस्थापनावश्यकं वर्तते। वैदिके काले जनमानसे मातृभूमिभावना सुदृढैवासीत् । विविधेषु जनपदेषु राष्ट्रेषु वा विभक्तेऽपि भारते वर्षे सर्वेषामपि हार्दिकी

कामनैकान्तिकंच लक्ष्यं समुद्र पर्यन्ते भूभागे राष्ट्रस्यैकस्यैव स्थापनासीत् । ऐतरेयब्राह्मणे (8.15) अस्यैव संश्रूयते ध्वनिः– "आऽन्तादा परार्धात्पृथिव्यै समुद्रपर्यन्ताया एकरालिति।" राष्ट्रे राज्ञोऽभिषेककृत्यं मातृभूमि–नमस्क्रियापूर्वकमेवासीत् – "नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्या––––"(वाजसनेयिसंहिता, 9.22), वृताय च राज्ञे सैव मातृभूमी राज्यरुपेण प्रदीयते स्म। अथर्ववेदस्य (3.4.2) "त्वां विशो वृणतां राज्याये" त्यादिना मन्त्रेण सिद्ध्यति यत् प्रजाभिरेव राज्ञो वरणं क्रियते स्म। अभिषेकानन्तरं राजा वर्णानां, ग्रामणीनां सभासमितिसदस्यानां रत्निनांचाधीनता–स्वीकरणात्पूर्वं मातृभूमेरधीनतां स्वीकुर्वाणोऽवदत् –– " पृथिवि मातर्मा मा हिंसीर्मा अहं त्वाम् " (शतपथब्राह्मणम् , 5,4,3,20) इति। शतपथब्राह्मणानुसारं(5,4,3,20) पृथिव्या राष्ट्रस्य वा राज्ञश्च मध्ये मैत्रीभावः संजायतेऽतो नैव माता पुत्रं हिनस्ति नापि च पुत्रो मातरम् – "न हि माता पुत्रं हिनस्ति न पुत्रो मातरम् ।" राष्ट्रं राज्यं वा राज्ञे संचालनाय, नियमनाय, रक्षणाय, धारणाय, कृष्यै, क्षेमाय, सम्पन्नतायै, पोषणाय संवर्धनाय च प्रदीयते स्म। वाजसनेयिसंहितायां (9.22) शतपथब्राह्मणे (5.2.1.25) चोक्तम्– "––इयं ते राड् यन्तासि यमनो ध्रुवोऽसि। कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा" इति।

राज्यसंचालने राजा सभासमितीत्येतयोर्जनसंघटनयोः साहाय्यं लब्धवान् । समितिः सम्भवतयासीत् समग्रस्य राष्ट्रस्यैका संस्था, यस्यां सकलापि जनता मिलित्वात्मनो राज्ञो वरणं कृतवती, निर्वासितंच राजानं समामन्त्र्य पुनरपि वृतवती। सार्वजनिक समस्यानामपि समाधानं तस्यामेवाभूत् । राज्ञः समितावागमनभावश्यकमासीत् (ऋग्वेदः,9.92.6: राजा न सत्यः समितीरियानः)। सभायांच सभासदः कमपि समस्याविशेषं विमृष्टवन्तस्तेषांच निर्णयः सर्वेषामपि कृते मान्योऽपरिहार्यश्चासीत् । सभासमिति निर्वाचनेऽविद्यत कश्चिद्विशेषः– समितौ साधारणजनानामुपस्थतिरासीत् , सभायांच केवलं राष्ट्रस्य वृद्धानामुत्तमजनानांच– "यत्र नरः समासते सुजाताः" (ऋग्वेदः, 7.1.4): "न सा सभा यत्र न सन्ति वृद्धाः" ।8 धर्मनिर्णयो न्यायो वा तस्या आसीत् मुख्यं कार्यम् । 9 स्वकर्त्तव्यनिर्वाहे ऽसफलो राजा स्वपदपरित्यागे विवशीक्रियते स्म (अथर्ववेदः, 3.4.6.7)। तैत्तिरीयसंहितायां (1.8.9.1), मैत्रायणीसंहितायां (2.6.5:4.3.8), काठकसंहितायां (15.4), शतपथब्राह्मणे (5.3.1.1), तैत्तिरीयब्राह्मणे (1.7.3.1) ऽन्येषु च ग्रन्थेषु रत्निपदाभिधेयानामन्येषामप्यधिकारिणामुल्लेखो विद्यते। ते चेमे–पुरोहितः, सेनानीः, क्षत्रः (राजसत्तायाः प्रतिनिधिः), महिषी, सूतः (सारथिः), ग्रामणीः, क्षत्ता (कंचुकी), संग्रहीता (कोषाध्यक्षः), भागदुघः (करादिविभागाधिकारी), अक्षावापो (आयव्ययलेखाध्यक्षः), गोविकर्ता (वनाध्यक्षः)च।

स्पष्टमिदमेतस्माद्यद् वैदिके युगे राजतन्त्रं प्रजातान्त्रिकमेवासीज्जनता च स्वाधिकारान्प्रति जागरुकावर्तत। अभिषेकसमये राजा प्रजाजनानां समक्षं राष्ट्राय प्रजाभ्यश्च न द्रोहिष्यामीति प्रतिज्ञामकरोत् – "यां च रात्रिमजायेऽहं यां च प्रतास्मि। तदुभयमन्तरेण इष्टापूर्तं मे लोकं सुकृतमायुः प्रजां वृंजीथा यदि ते द्रुह्येयमिति" (ऐतरेयब्राह्मणम् , 8.3.15)। राज्ञोऽवस्थितिः प्रजाधारैवासीत् – "विशि राजा प्रतिष्ठितः" (वाजसनेयिसंहिता, 20.9)। प्रजाभिस्तस्य वांछानिवार्यासीत्– "विशस्त्वा सर्वा वांछन्तु" (ऋग्वेदः, 10.173.1: अथर्ववेदः, 4.8.4)।

राजा प्रजाश्चात्मनो राष्ट्रं मातृभूमिं वा प्रति महतीं श्रद्धां भक्तिंचानुबभूवुः। ऋग्वेदे (10.174.1–2,5)

ब्रह्मणस्पतिः प्रार्थ्यते यत्तत्स्मान् राष्ट्रायाभिवर्तय, अस्माकं सपत्नानामरात्तीनांचाभिभवं कुरु, युद्धेच्छुकानामीर्ष्यावतांचास्माकं शत्रूणां पराभवं विधत्स्व, मांच शत्रुविरहितं, सपत्नहन्तारमभिगतराष्ट्रं, शत्रूणामभिभवितारं, प्राणिनां जनानांचाधीश्वरं कुर्विति–

तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्तय।

अभिवृत्य सपत्नानभि या नो अरातयः।

अभि पृतन्यन्तं तिष्ठामि यो न इरस्यति।।

असपत्नः सपत्नहाभिराष्ट्रो विषासहिः।

यथाहमेषां भूतानां विराजनि जनस्य च।।

वाजसनेयिसंहितायां (22.22) राष्ट्रस्य भौतिक बौद्धिकप्राकृतिक सुखसमृद्धयै कामनाभिव्यक्ता। ऋषिः कामयते यदस्माकं राष्ट्रे ब्रह्मवेत्तारो ब्राह्मणा जायन्ताम् , शूरा महारथिनः शस्त्रविद्यानिष्णाताः क्षत्रियाः सम् ुत्पद्यन्ताम्ः दुग्धवत्यो गावो वोढारोऽनड्वाहः क्षिप्रगामिनश्चाश्वा भवन्तुः; रुपगुणादिसम्पन्नाः सुशीला नार्यो विलसन्तुः यजमानानां पुत्रा वीरा विजयशीलाः सभ्याश्च भवन्तुः पर्जन्योऽस्मदावश्यकतानुरुपं वर्षतुः अस्माकमोषधयः फलवत्यः पच्यन्ताम् , अस्माकं योगक्षेमश्च कल्पतामिति-

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः

शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनु-र्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।।

नूनमेव वैदिकं राष्ट्रगीतमिदमिति वयं वक्तुं शक्नुमः।

मातृभूमेः सर्वातिशायिनी महिममण्डिता भावप्रवणा च स्तुतिरथर्ववेदस्य भूमिसूक्ते (12.1) समुपलभ्यते। अस्मिन्नथर्वा समग्राणां पार्थिवपदार्थानां जननीं, सर्वप्राणिनां सकलपदार्थानांच पोषिकां मातृरुपिणीं वसुन्धरां सं स्तौति तांच प्रजानां समस्तेभ्यो दोषेभ्यः क्लेशेभ्योऽनर्थेभ्यश्च परिरक्षणाय सुखसमृद्धिप्राप्त्यैचार्थयते। ऋषेर्दृष्टिः पृथिव्याः सर्वेष्वपि रुपेषु- तस्या मृद्वननदीपर्वतेषु, उच्चानुच्चसम प्रदेशेषु, कृषिसम्पत्तौ, पशुपक्षिषु, वृक्षौषधिषु, ऋतुषु, यज्ञवेदियूपेषु, सभासमितिषु, नानाभाषाभाषिषु नैकधर्मावलम्बिषु च जनेषु समापतिता। भूमेर्मातृरुपेऽवधारणा त्वृग्वेदेऽपि दृग्गोचरीभवति-

" माता पृथिवी महीयम् " (1.164.33): " उप सर्प मातरं भूमिम् " (10.18.10): "माता पुत्रं यथा सिचाऽभ्येनं भूम ऊर्णुहि" (10.18.11)। भूमिः सुशेवा दयाभावसमन्विताथवा मातेति समुद्घोषिता- "उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् " (ऋग्वेदः, 10.18.10)। तथाप्यथर्ववेदीये भूमिसूक्ते यादृशो गभीरभावनिर्भराः समुद्गारास्तादृशस्त्वन्यत्र सुदुर्लभा एव। भूरिधारा माता पृथिवी पयोदोहनार्थं ध्रुवा धेनुरिव द्रविणधारासहस्रदोहनार्थंचाभ्यर्थिता- "सा नो भूमिर्भू रिधारा पयो दुहाम् " (9), "सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती" (45)। पृथिवी हिरण्यवक्षा, विश्वम्भरा, वसुधानी, प्रतिष्ठा जगतश्च निवेशनीति प्रतिपादिता- "विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी" (6)। सैवादितिः (अखण्डनीया), कामदुघा, जनानामावपनी चेति कथिता- "त्वमस्यावपनी जनानामदितिः कामदुघा पप्रथाना" (61)। विस्तृतस्थानप्राप्त्यै तामृषिर्याचते- "उरु लोकं पृथिवी नः कृणोतु" (1)। सः प्रार्थयते यत्पृथिवी अस्मभ्यमैश्वर्यं तेजश्च दधातु- "भगं वर्चः पृथिवी नो दधातु" (5) : धनं वितरतु - "भूमि --------द्रविणे नो दधातु" (6): वाचो मधु दधातु- "वाचो मधु पृथिवि धेहि मह्यम् " (16): स्वशिवकारकैस्तत्तै रस्मान् सुखयतु- "यच्छिवं तेन नो मृल" (46, 47): अस्माकं वृद्धिं वितनोतु- "सा नो भूमिर्वर्धयद् वर्धमाना" (13)। सपत्नप्रणोदनार्थमसापत्न्यविधानार्थंचापि सा भूमा मही याचिता- "सा नो भूमिः प्र णुदतां सपत्नानसपत्नं मा पृथिवी कृणोतु (41): सैवास्माकमुत्तमे राष्ट्रे कान्तिं बलंचाधातुं प्रेरिता- "सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे" (8)। मातृभूमिभक्तिनिर्भरमानस ऋषिः शान्तां, सुरभितां, सुखकरीममृतपरिपूर्णस्तनीं पयस्वतीमुरुव्यचसं पृथिवीं पयसा

सहानुग्रहभावार्थं याचते–

शन्तिवा सुरभिः स्योना कीलालोध्नी पयस्वती।

भूमिरधि ब्रवीतु मे पृथिवी पयसा सह।।

मातृभूमेरुपासको द्रोहपरान् शत्रून् हन्मीत्युच्चैरुद्घोषयति– "अवान्यान् हन्मि दोधतः" (58)। स आत्मानं सर्वतो विजयशीलं, सर्वजयिनं सर्वदिग्विजेतारंचानुभवति– "अभिषाऽस्मि विश्वाषाडाशामाशां विषासहिः" (54)। इत्थमथर्वण ऋषेरिदं भूमेर्यशोगानं वीरताया भावनयानुप्राणितं विद्यते। स्नेहनिर्भरमृषि चित्तमनुनयति मातरं भूमिं मातेव पुत्राय पयोविसर्जनाय– "सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः" (10)। एकस्मिन्मन्त्रे तु भक्तिभावविह्वल ऋषिर्भूमिः पृथिवी मम माताहंच तस्याः पुत्र इति कथयितुं विवशीभावमापन्न :– "माता भूमिः पुत्रो अहं पृथिव्याः" (12)। ग्रामेष्वरण्येषु, सभासु, सङ्ग्रामेषु समितिषु च वयं भूम्याश्चारु वदेमेति तस्याभिलाषः–

ये ग्रामा यदरण्यं याः सभा अधि भूम्याम् ।

ये सङ्ग्रामाः समितयस्तेषु चारु वदेम ते।। (56)

दीर्घायुष्यं प्राप्य प्रतिबुध्यमाना वयं पृथिव्यै बलिहृतः स्यामेति तस्य मनोरमो मनोरथः– "दीर्घं न आयुः प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम" (62)। समग्रेऽपि विश्ववाङ्मय एतादृग् राष्ट्रियभावनाभरितमुदात्तभावोद्गारसंवलितं मातृभूमि–संस्तवनं नूनमेवास्ति सुदुर्लभम् । पृथिव्यां विविधभाषाभाषिणो विविधधर्मावलम्बिनश्च जनाः तथैव तिष्ठन्ति यथा कुटुम्बिनो नराः परस्परं सौहार्दमनुभवन्त एकगृह एव वसन्ति– "जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम् " (45)। आथर्वणवाक्यमिदं धर्मभाषाव्याजेन भारतं विखण्डयितुमहर्निशं प्रयतमानेभ्यः, साम्प्रदायिकतोपहतचित्तेभ्यः, स्वनिर्दोषदेशवासिनां नृशंसतया वधविधातृभ्यो नरकाकेभ्यः समुन्मीलयतीव सत्पथं, प्रेरयतीव च मानवमनुभवितुं विविधतायामेकतामुद्घाटयतीव च भिन्नभाषाभाषिभ्यो भिन्नधर्मसंश्रितेभ्यश्च जनसमुदायेभ्यः सौहार्दपूर्णं सहास्तित्वं बन्धुत्वंच।

वेदमन्त्रेषु राष्ट्राभ्रंशनाय10, राष्ट्रधारणाय11, राष्ट्रानुकूलं व्यवहारायैवंच12 राष्ट्रनिर्माणाय बहुत्रोपदेशा दृक्पथमायान्ति।

कस्यचिदपि राष्ट्रस्य सततमभ्युदयाय तस्य सर्वेष्वपि वर्गेषु परस्परं प्रेमावश्यकं वर्तते। अतो वेदे ब्राह्मणक्षत्रियवैश्यशूद्रवर्णेभ्यः परस्परं प्रेमभावः समुपदिष्टः। ऋषिणा काम्यते यदहं देवरुपाणां ब्राह्मणानां, क्षत्रियाणां, पश्यतां सर्वेषां प्राणिनां, वैश्यानां, शूद्राणांच प्रियो भूयासम् : ब्राह्मणेषु, क्षत्रियेषु, वैश्येषु, शूद्रेषु चास्माकंप्रेम भूयात्, मनस्यस्माकं च प्रेम्णा प्रेमोत्पत्तिर्जनिषीष्ट–

प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।

प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये।। (अथर्ववेदः, 19.62.1)

रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि।

रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ।। (वाजसनेयिसंहिता, 18.48)

एतेषु वर्णेष्वपि ब्राह्मणानां क्षत्रियाणांच परस्परं सहयोगो वेदे सम्यक् प्रतिपादितः। वस्तुतस्तु ब्राह्मणाः समाजस्य बौद्धिकपक्षस्य क्षत्रियाश्च शक्तिपक्षस्य प्रतिनिधयः। तेषां सम्यगाचरणात्सहयोगाच्चान्ये वर्णा वर्गा वा स्तव

एव नियन्त्रिताः, सम्यगाचरणशीलाः राष्ट्रंप्रति च सर्वथा समर्पिता भविष्यन्ति। अतोऽधस्तने मन्त्रद्वये ब्राह्मणक्षत्रिययोर्मैत्रीभावः, सम्यगाचरणं, श्रीयुक्तत्वंच काङि.क्षतम् –

यत्र ब्रह्म च क्षत्रं च सम्यंचौ चरतः सह।

तँल्लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना।। (वाजसनेयिसंहिता, 20.25)

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।

मयि देवा दधातु श्रियमुत्तमां तस्यै ते स्वाहा।। (तदेव, 32.16)

कस्यचिदपि राष्ट्रस्य सर्वाङ्.गीणविकासस्य हेतोरनिवार्यमिदं यत्सकलानां प्रजाजनानां भोजनादिसम्बन्धिनीनां प्राथमिकीनामावश्यकतानां पूर्तिर्भवेदिति। एतस्मादेव वेदे सर्वेषामत्र प्राप्तिरन्नरक्षा च प्रतिपादिते–

न किष्ट एता व्रता मिनन्ति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ। (ऋग्वेदः, 1.69.7)

क्षुध्यद्भ्यो वय आसुतिं दाः (तदेव, 1.104.7)

मा वः सुस्रोच्चमसो दृंहता तम् । (तदेव, 10.101.8)

कस्मिंश्चिदप्युत्तमे राष्ट्रे क्षुद्रादपि क्षुद्रस्य प्रजाजनस्य प्रगतिरनिवार्या भवति। अत ऋग्वेदे (1.81.2) कथितं यदिन्द्रः क्षुद्रस्यापि वृद्धिकृद् वर्तते– "असि दभ्रस्य चिद् वृधः।" एतदतिरिक्तमेतदप्यावश्यकं यद् राष्ट्रे कोऽपि सबलो जनो दुर्बलं प्रत्यत्याचारं न कुर्यात्तस्य शोषणं न कुर्यादिति। अतोऽथर्ववेदे (3.29.3) भणितम् –"यत्र शुल्को न क्रियते अबलेन बलीयसे"। वेदे सार्वत्रिकशम्भावस्य कामनास्यैव सर्वलोक कल्याणस्य डिण्डिमध्वनिर्वर्तते।

ऋग्वेदीये संज्ञानसूक्ते (10.191.2–4) ऽथर्ववेदीये च सांमनस्यसूक्ते (6.64.1–3) राष्ट्रस्य सर्वेषामपि मानवानां क्रियाकल्पानां मनोबुद्धिविचाराणांच पूर्णसामंजस्यस्य भावना व्यक्तिं प्रापिता। सर्वनियन्त्रा परमेश्वरेण जनाः सङ्.गमनाय, सम्भाषणाय, सांमनस्याय, समानमन्त्राय, समानसमित्यै, समानमनसे, समानचित्ताय, समानाकूत्यै, समानहृदयत्वाय सुसहभावाय चादिष्टाः–

सं गच्छध्वं सं वदध्वं13 सं वो मनांसि जानताम् ।

देवा भागं यथा पूर्वे संजानना उपासते।।

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।

समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि।।

समानी व आकूतिः समाना हृदयानि वः।

समानमस्तु वो मनो यथा वः सुसहासति।।

एतादृश्येव हार्दिकी मानसी चैकता विद्वेषशून्यता चाथर्ववेदस्यान्यस्मिन् सांमनस्यसूक्ते (3.30.1.7)ऽभिव्यक्तिं गता। अस्मिन्नपि जगदीश्वरेण मानवानां कृते सहृदयतायाः, सांमनस्यस्याविद्वेषस्य, परस्परं मधुरभाषणस्य, संज्ञानस्य, सव्रतत्वस्य, सौमनसस्य, सपीतेः, सग्धेः, सहकारित्वस्य, सङ्.गतेश्च शिक्षा प्रदत्ता–

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।

अन्यो अनयमभि हर्यत वत्सं जातमिवाघ्न्या।।

अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ।।
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यंचः सव्रता भूत्वा वाचं वदत भद्रया।।
येन देवा न वियन्ति नो च विदिषते मिथः।
तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः।।
ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः।
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीन्वः संमनसस्कृणोमि।।
समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि।
सम्यंचोऽग्निं सपर्यतारा नाभिमिवाभितः।।
सध्रीचीनान्वः संमनसस्कृणोम्येकश्नुष्टीन्त्संवनेन सर्वान् ।
देवा इवामृतं रक्षमाणां सायंप्रातः सौमनसे वो अस्तु।।14

अस्मिन्प्रसङ्.गे ऽथर्ववेदीयमेकमन्यदपि सांमनस्यसूक्तं (6.74.1–3)ध्यातव्यम् । अस्मिन् हीश्वरेण शारीरिकं, मानसिकं, व्रतविषयकञ्च संज्ञपनमैक्यं वा सांमनस्यंचोपदिष्टम् –

सं वः पृच्यन्तां तन्वः सं मनांसि समु व्रता।
सं वोऽयं ब्रह्मणस्पतिर्भगः सं वो अजीगमत् ।।
संज्ञपनं वो मनसोऽथो संज्ञपनं हृदः।
अथो भगस्य यच्छ्रान्तं तेन संज्ञपयामि वः।।
यथादितया वसुभिः संबभूवुर्मरुद्भिरुग्रा अहृणीयमानाः।
एव त्रिणामन्नहृणीयमान इमांजनान्त्संमनसस्कृधीह।।

वेदे सग्धेः सपीतेश्चोल्लेखो दरीदृश्यते– "सग्धिश्च मे सपीतिश्च मे" (वाजसनेयिसंहिता, 18.9): "आयुष्मन्तः सहभक्षाः स्याम (अथर्ववेदः,6.47.1)।

वेदे मानवो विद्वेषं विहाय परस्परं रक्षणाय प्रेरितः– "पुमान्पुमांसं परि पातु विश्वतः" (ऋग्वेदः,6.75.14): मानवमात्रं प्रति सुमतिः सद्भावना वा शिक्षिता– "यांश्च पश्यामि यांश्च न तेषु मे सुमतिं कृधि" (अथर्ववेदः, 17.1.7): द्वेषभावाज्जनो निवारितः– "मा नो द्विक्षत कश्चन" (अथर्ववेदः, 12.1.23–25): समेषामपि मित्रचक्षुषा दर्शनमादिष्टम् – "मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे" (वाजसनेयिसंहिता, 36.18)। एतेषु वचनेषु वैदिकजनमानसस्य सर्वमैत्री, सर्वशान्तिः सर्वकल्याणकामना च मुखरीभवति।

सर्वमानवेभ्यः सद्भावनाया मैत्रीभावाच्च सार्वत्रिक्यभयभावनोदेति, या मानसिकं नैतिकंच्चोत्कर्षं विकासंच सङ्.केतयति। वेदेऽस्या अभयभावनाया अनेकत्राभिव्यक्तिर्विद्यते। निदर्शनार्थमथर्ववेदीयाः कतिपयाः सन्दर्भा (6.40: 19.14,15,16) अवलोकनीयाः। अत्र केवलं मन्त्रद्वयमेवोदाह्रियते–

अभयं न करत्यन्तरिक्षमभयं द्यावापृथिवी उभे इमे।
अभयं पश्चादभयं पुरस्तादुत्तरादधरादभयं नो अस्तु।।
अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः।
अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु।। (अथर्ववेदः, 19.15.5–6)

अत्र सर्वलोकेषु सर्वदिक्षु च मित्रादमित्रात् परिचिताद् दूरस्याद्वा जनादभयमभ्यर्थितम्: सर्वा दिशो मम मित्रं भवन्त्विति चाभिलषितम् ।

वेदे व्यक्ता राष्ट्रियभावना, मातृभूमिभक्तिः, संज्ञानस्य सांमनस्यस्य कल्याणस्य च धारणा भारतभूमौ भारतीयचेतसि प्राकाश्यमवाप्यापि जगतः सकलानामपि राष्ट्राणां कृत आदर्शरुपा वर्तन्ते। अत्रे हि विश्वमानववादस्य, विश्वशान्तिवादस्य, विश्वबन्धुत्वस्य, विश्वकल्याणस्य नैतिकसाम्यवादसमाजवादयोश्च दर्शनं जायते। वस्तुतस्तु वैदिकधारणानुसारं समग्रापि मानवजातिरात्मरुपतयैकत्वमेव भजते, भेदस्तु केवलमाभासात्मकमनित्यंचैव भवति, न वास्तविकम् । यजुर्वेदीयवाजसनेयिसंहितानुसारं विश्वमेकनीडं विद्यते– "यत्र विश्वं भवत्येकनीडम् " (32.8): अथर्ववेदानुसारंचैकरुपम् – "यत्र विश्वं भवत्येकरुपम्" (2.1.1)। ऋग्वेदीय "एकं वा इदं वि बभूव सर्वम् " (8.58.2) इत्यादौ मन्त्रेऽप्यस्यैवैक्यस्योद्घोषः। इयमेव विश्वमानववादस्य दार्शनिक्याध्यात्मिकी च दृढाधारशिला।

आगच्छत, वयं सर्वे परस्परं भेदभावं परित्यज्य राष्ट्रस्य प्रगतेर्वृद्धेर्विकासस्य च पुरोगामिनो भूत्वा तत्प्रति जागरुका भवाम–

"वयं राष्ट्रे जागृयाम पुरोहिताः"। (वाजसनेयिसंहिता, 9.23)।

सन्दर्भिका

1. 10.173.1,2,5।
2. 10.2।
3. 3.4.8.1: 5.7.4.4।
4. 1.11.4।
5. 10.3.12, 16: 13.1.15: 19.41.1।
6. 10.12.3।
7. 2.1.11
8. पं0 बलदेव उपाध्यायः वैदिक साहित्य और संस्कृति (वाराणसीः शारदा संस्थानम् , चतुर्थं संस्करणम्, 1973), पृ0 444–445। वस्तुतः सभासमित्योवास्तिविकं स्वरुपं न निश्चिततया ज्ञायते; अत एवस्मिन् विषये नास्ति विदुषां मतैक्यम् । हेली ब्रैण्डेमहोदयानुसारं समितिरार्याणामेका संस्थासीद् यस्याः सदस्यानां सम्मेलनस्य स्थानं भवनं वा सभेति भण्यते स्म। त्सिम्मरमहोदयेन सभा ग्राममात्रसंस्थैकेति मतम् (श्यामलाल पाण्डेयः वेदकालीन राज्यव्यवस्था, लखनऊः हिन्दी–समितिः, सूचना–विभागः, उत्तर प्रदेशः, 1971, पृ0 136): परं नैतेन वैदिकराज्येऽनेक–सभानां सत्ता प्रतिषिद्धयते। ग्रिफिथो ग्रामीणजनसम्मेलनं सभेति याज्ञिक धार्मिक प्रयोजनैश्च जनानां सम्मेलनं समितिरिति च मनुते (प्रियाव्रतो वेदवाचस्पतिः वेदों में राजनीतिक सिद्धान्त, मेरठः मीनाक्षी प्रकाशनम् , भागः1, पृ0 210)। काशीप्रसादो

जायसवालो राष्ट्रस्य सर्वेषां जनानां सभेति सा च राज्ञो वरणं कृतवतीति स्वीकरोति। श्यामलाल पाण्डेयः सभा स्थायिन्युपसमितिः समितेरिति मन्यते (पूर्वोद्धृतो ग्रन्थः, पृ0 137)। लुड्विक् सभासमित्यार्याणामेकस्या एव संस्थायाः सदनद्वयमिति स्वीकरोति। प्रियव्रतेन वेदवाचस्पतिना एत एकस्या एव सभायाः (Legislature)सभाद्वयमिति मतमुपन्यस्तम्–अवरा सभा (Lower House) सभेत्युच्चा सभा (Upper Lower)समितिरित्यासीत् । एतयोः समितिः सभापेक्षया महत्वपूर्णासीत् (पूर्वोद्धृतो ग्रन्थः, पृ0 231)।

9. पारस्करगृह्यसूत्रे (3.13) जयरामस्य टीकावलोकनीया।

10. ऋग्वेदः, 10.173.1: मा त्वद्राष्ट्रमधि भ्रशत् ।

11. तदेव, 10.173.2: इह राष्ट्रमु धारयः 10.173.5: राष्ट्रं धारयतां ध्रुवम्: कात्यायनश्रौतसूत्रम् , 5.13.1।

12. ऋग्वेदः, 10.174.1।

13. अथर्ववेदे (6.64.1) "सं गच्छध्वं सं वदध्वम् " (ऋग्वेदः, 10.191.2) इत्यस्य स्थाने "सं जानीध्वं सं पृच्यध्वम् " इति पाठः।

14. कौशिकसूत्रानुसारं (12.5) सूक्तमिदमथर्ववेदस्य मानसिकैक्योत्पत्यर्थं विनियुक्तेषु सप्तसु (3.30: 5.15: 6.64, 73, 74,94: 7.52) सूक्तेष्वन्यतमः।

महाकवि-कालिदासस्योपरि वेदानांप्रभावः

आचार्य वेदप्रकाशशास्त्री

संस्कृतसाहित्ये यद्यपि स्वनामधन्यानां बहूनां कविवराणां यशः प्रशस्तयः समुल्लसन्ति; तथापि तत्र कालिदासस्य विशिष्टं स्थानं-विद्यते। कालिदासः शब्दार्थमयीं रचनामेव साहित्यं न मन्यते, स तु मानवजीवननिर्मितावेव बद्धादरः सन् चतुर्वर्गफलप्राप्त्यर्थं काव्यकरणे नैसर्गिकी प्रतिभां प्रभावयति। चतुर्वर्गशब्द व्यपदेश्यानां धर्मार्थकाममोक्षाणां प्रथमे ह्युपदेष्टारः खलु वेदा एव। तात्विकदृष्ट्या वेदाभिमतस्वरुपाणां धर्मादीनां प्रबोधाय एव काव्यप्रवृत्तेरुदयः सतां कविवराणामभिमतः। काव्यप्रयोजनान्यभिलक्षयता केनापि लक्षणकृतोदीरित कारिकोचितैव-

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ।।

यः कवीश्वरः रसवत्या सरस्वत्या साहित्यं वितन्वन् वेदोद्गीतान् धर्मादीन् सामाजिकानां मनसि समानं प्रतिष्ठापयति स एव याथार्थ्यवेत्ता शब्दार्थसमन्वितस्य काव्यस्य च कर्ता। पुरा कविपरम्परयात्मानं संयोजयन्तः समजायन्त महान्तो हि कवीश्वराः। परं तत्र केचन विरला एव विश्वकविपदालङ्.कृताः लोक सत्कृताश्च। तेष्वेवान्यतमः कालिदास एवंविधः कविराजो बभूव यस्य महद्यशः सम्प्रत्यपि जगत्यां प्रसरति। कालिदासः कविताव्याजेन वेदानामेव व्याख्यानं चक्रे। तस्य वेदेषु महती निष्ठा आसीत्। अत एव स पदे पदे वेदान्प्रति स्वश्रद्धा भावं संचारयामास। रघुवंशस्य प्रथम एव सर्गे मनुं मानयन् वेदानामाद्यमक्षरं प्रणवंमेने-यथा-

वैवस्वतोमनुर्नाममाननीयोमनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।। रघु0 1/11

एवमेव- तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया।
मार्गंमनुष्येश्वर धर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ।। रघु0 2/2

अत्र स्मृतीनां वेदानुगामितां निगद्य वेदानां स्मृतिभ्यः प्रागवर्तित्वं प्रमाणयामास। कालिदासो यां यां वर्णनां चक्रे सा सा वर्णना वेदानुमोदिता एव। मानवानाभ्युदयाय वेदेषु ये अपि सदुपदेशा आदेशा वा सन्ति तानेव यथा स्थानं कालिदासः स्वसाहित्ये निष्ठामयेन रचनाचातुर्येणसंन्निवेशयति।

यथा–

संस्कारवर्णनप्रसंगे :– मानवजीवनं संस्कर्तुं वेदेषु संस्कारपरम्परा दृश्यते। संस्कारपूत एव पुमान् संसारे, शुद्धाचारे भवति साभिलाषः। वेदेषु बालकानां "नामकरण– संस्कारव्यवस्था प्राप्यते। पारिवारिकजना लोके यथेच्छमन्वर्थहीनं बालकानां नाम कुर्वन्ति, परं वेदः कथयति यदन्वर्थकमेव" नाम शोभाकरमभ्युदयकरंच भवति। वेदे व्यवस्था प्रदत्ता यत्पितैव बालस्य नामकरणं कुर्यात्, स एव प्रथमं नाम्ना तं बालकमलङ्.कुर्यात्। यथा यजुर्वेदीयो मन्त्रः–

कोऽसि कतमोऽसि कस्यासि को नामासि।

यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम ।। (यजु० 6/29)

अमुं मन्त्रं पठन् बालकस्य नासाग्रभागमङ्.गुल्यग्रेण संस्पृशन् पिता नाम ददाति। रघुवंशे राजा दिलीपश्चिरादधिगतं पुत्रं वेदमन्त्रपूतेन नामकरणसंस्कारेण पावयति। अथ च पुत्रस्य श्रुतपारगामितां शत्रोश्चान्तकारितां कामयमानो रघुनाम्ना तं संस्करोति–

श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः।

अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् ।। (रघु० 3/21)

एवमेव यदा राजा रघुर्ब्राह्मे मुहूर्ते सूतिकागेहे स्वजायायाः क्रोडभागमर्भकरत्नभासा भासमानं ददर्श तदासौ परं प्रीतः सन्नात्मजस्य नाम "अज" चकार

ब्राह्मे मूहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् ।

अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ।। (रघु० 5/36)

कालिदासो रामजन्मसमये "रमन्तेयोगिनोऽस्मिन्निति" व्युत्पत्तिं नाभिमन्यते। स तु रामे रुपाभिरामतामभिलक्ष्य तन्नाम "राम" इति कर्तुं गुरुणां चेतसि भावमाविर्भावयति। जन्मलब्ध्वैव रामः स्वकीयेनाप्रतिमतेजसा सर्वान् दीपान् हेपयामास; अत एव तन्नामाभूद् रामः। यथा–

रघुवंश प्रदीपेन तेनाप्रतिमतेजसा।

रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् । (रघु० 10/68)

राम इत्यभिरामेण वपुषा तस्य चोदितः ।

नामधेयं गुरुश्चक्रे जगत्प्रथममङ्.गलम् ।। (रघु० 10/67)

उपनयनसंस्कारस्य मानवजीवने बहुतरं महत्वमस्ति। उपनयनमन्तरेण बालो हि द्विजतामेवनोपयाति। उपनीत एव ब्रह्मचारी वेदाध्ययने प्राप्ताधिकारो भवति। अतएव आचार्यो ब्रह्मचारिणमुपनीय तं वेदमध्यापयति। यथा–

"आचार्य उनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।

तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः।" (अथर्व, 12,5,3)

महाकविः कालिदासो रघुवंशे राजकुमारस्य रघोविद्या–प्रसङ्.गेऽतीव दत्तावधनो दृश्यते, अत एवासौ प्रथमं बालस्योपनयनं वर्णयति तदनन्तरं विद्याभ्यासं। उपनीते तु ब्रह्मचारिणि विद्या प्रवेशः सुखसाध्यो भवति। यथा–

अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।

अबन्ध्य यन्ताश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति।। (रघु०/3/29)

धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्त्रश्चतुर्णवोपमाः।

ततार विद्याः पवनातिपातिभिर्दिशो हरिदिभिर्हरितामिवेश्वरः।। (रघु० 3/30)

पारिवारिकवर्णनप्रसंगः

वेदे पारिवारिकान् जनान् सुखान्वितान् कर्तुं बहवो विचाराः परिस्पन्दसुन्दरा विभान्ति। पारिवारिकीं व्यवस्थां सुद्रढयितुमथर्ववेदे केचन् मन्त्राः प्राप्यन्ते तान् मन्त्रान् पठित्वा विचार्य च यदि व्यवहृतिवितन्यते तर्हि नूनं परिवारे भवति सुधाधिवासः ।सहृदयं साम्मनस्यमविद्वेषं कृणोमि वः।

अन्योन्यमभिहर्यत वत्सं जातमिवाघ्न्यां।।

अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।

जाया पत्ये मधुमतीं वाचं वदतु शान्तिवान् ।।

मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा।

सम्यंचः सव्रता भूत्वा वाचं तदत भद्रया।। (अथर्व 3/20/1-3)

कालिदास एतान् मन्त्रानभिवीक्ष्य एव स्वकृतिषु यथावसरं पारिवारिकानां जनानां वर्णनं चकार। लोके स एव पुत्रो विजयते, जनैरभिनन्द्यते च यः पितरमनुवर्तते। रघुवंशे अजः सर्वात्मना स्वपितरमेवानुसरति, रुपेणौजसा वीर्येण च पितरमेवानुवदति। यथा-

रुपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम् ।

न कारणात् स्वाद् बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ।। (रघु० 5/37)

कालिदासः पितापुत्रयोरैक्यं पश्यति। पितुः प्रयत्नात् पुत्रस्य वृद्धिर्भवति, पिता पुत्रे स्वकीयामेव कमनीयां कान्तिं निक्षिपति; अत एव शुभैः शरीरावयवैर्दिने दिने परिवर्धमानं रघुं वर्णयन् कविराह-

पितुः प्रयत्नात् स समग्रसम्पदः शुभैः शरीरावयवैर्दिनेदिने।

पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः।। (रघु० 3/22)

निरुक्तस्यपरिशिष्टे एको मन्त्रः प्राप्यते, तदनुसारं पुत्रः पितुरनुकृतिरेव भवति। अत एव पुत्राभ्युदयमात्माभ्युदयमेव मन्यते पिता। पितुरड्.गादड्.गात् पुत्रस्य संभवो भवति। यथा मनो द्रष्टं शक्यते-

अड्.गादड्.गात् संभवसि हृदयादधिज्ञायसे।

आत्मा वै पुत्र नामासि स जीव शरदः शतम् ।। (निरुक्तपरिशिष्ट)

राजा दिलीपः स्वपुत्रं रघुं क्रोडे निधाय निमीलितलोचनः यं सुखविशेषमनुभवति, श्रुतिमनुसरन् तमेव वर्णयति कालिदासः। यथा-

तमड्.कमारोप्य शरीरयोगजैः सुखैर्निषिंचन्तमिवामृतं त्वार्च।

उपान्त संमीलितलोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ।। (रघु० 3/26)

पितरि सत्कृतिं वितन्वानेन पुत्रेण पिता, पुत्रे वत्सलतामास्थापयता पित्रा च पुत्रः कथं पिता

समाराधानतत्परेण पुत्रेण पुत्री स यथैव तेन।

पुत्रस्तथैवात्मजवत्सलेन स तेन पिता पितृमान् बभूव।। (रघु० 18/11)

पुत्रस्य मातरि निर्विषमा भावना भवेत् । सर्वासु मातृषु पुत्रः समतया श्रद्धां प्रकटयेत् इमामेव भावनां पोषयितुं कालिदासः रामचरित्रं वर्णयन्नाह–

सर्वासु मातृष्वपि वत्सलत्वात् स निर्विशेष प्रतिपत्तिरासीत् ।

नेता चमूनामिव कृत्तिकासु।। (रघु० 14/22)

पत्नी पत्युरानन्दं परिवर्धयितुं सदैव मधुमतीं वाचं वदतु, पत्या निराकृतापि कदापि तं नापवदेत् । कालिदास इमामेव वैदिकीं भावनां तेन श्लोकेन समर्थयति यत्र रामपरित्यक्ता सीता रामं प्रति एकमप्यभद्रं शब्दं नोक्तवती–

न चावदद्भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनादृतेऽपि।

आत्मानमेव स्थिर दुःखभाजं पुनः पुनर्दुष्कृतिनं निनिन्द।। (रघु० 14/57)

एको भ्राता अपरस्मिन् भ्रातरि द्वेषं नाविर्भावयेत् अपितु प्रेमदृष्ट्या सम्मानं प्रकटयेत् । भ्रात्रोरन्योऽन्यं सौहार्द एव सुखवर्धको भवति। कालिदासो रामलक्ष्मणयोर्भरतशत्रुघ्नयोश्चैक्यं चारुतयोपमालङ्कारेणालंचकार–

तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन।

यथा वायुविभावस्वोर्यथा चन्द्रसमुद्रयोः ।। (रघु० 10/82)

या पत्नी पुत्रं, सौमनस्यं वित्तं, श्रद्धां च कामयते तया पत्युरनुगामिन्या भाव्यम् । पतिमनुसरन्ती सती सर्वान् कामानवाप्नोति। अत एव अथर्ववेदे प्राप्यते मन्त्रः–

आशासाना सौमनसं प्रजां सौभाग्यं रयिम् ।

पत्युरनुव्रता भूत्वा संनह्यस्वामृताय कम् ।। (अथर्व/14/1/42)

रतिवर्णन प्रसंगे कालिदास इमामेव भावनां पुपोष–

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते।

प्रमदा पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि।। (कुमार० 4/33)

राजवर्णन प्रसंगे

वेदे यद्यपि राज्ञो वर्णनं बहुशो विलोक्यते परमथर्ववेदे राजवर्णनं किमपि वैलक्षण्यावहम् । तत्र दीप्तिमंतो राजे राजत्वं न स्वीकृतमपितु प्रजानुरंजनकरस्य राज्ञो राजत्वं स्वीकृतम् । यो राजा प्रजा अनुरंजयति स एव राजा।

यथा – सोऽरज्यत ततो राजन्योऽजायत। (अथर्व 15/8/1)

कालिदासो ऽपि अथर्ववेदीयममुमेवं मन्त्रमनुसरन् रघुवंशे रघुवर्णने राजशब्दस्य निर्वचनमेव चकार–यथा–

यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा।

तथैव सोऽभूदन्वर्थो राजा प्रकृतिरंजनात् ।। (रघु० 4/12)

तत्र यथा राजा प्रजासु कृतानुरागस्तथैव प्रजा अपि राजनि कृतानुरागाः–

प्रसाद सुमुखे तस्मिन् चन्द्रे च विशदप्रभे।

तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः।। (रघु० 4/18)

राज्ञः कर्त्तव्यमिदं भवति यदसौ सर्वप्रकारेण प्रजाः पातु। राज्यं प्रशासति राजनि कश्चिदपि प्रजाजनः केनापि दुःखेनपीडितो न स्यात्। अथर्ववेदे विलोक्यते मन्त्रद्वयम् –

स विशः सबन्धूनन्नमन्नाद्यं अभ्युदतिष्ठत।। (अथर्व/15/8/2)

विशां च वै सबन्धूनां चान्नस्य चान्नाद्यस्य च प्रियंधाम भवति य एवं वेद।। (अथर्व/15/8/3)

कालिदासो रघुवंशे शाकुन्तले च राजानं वर्णयन् उभयोमन्त्रयोर्व्याख्यानमेव कृतवानिति बिलोक्यते– यथा–

तं वेधा विदधे नूनं महाभूत समाधिना।

तथाहि सर्वे तस्यासन् परार्थैकफला गुणाः।। (रघु० 1/29)

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।

स पिता पितरस्तासां केवलं जन्महेतवः।। (रघु० 1/24)

प्रजाः प्रजा स्वा इव तन्त्रयित्वा निषेवते श्रान्तमना विविक्तम्। (शाकु०/5/5)

नियमयसि विमार्ग प्रस्थितानात्तदण्डः

प्रशमयसि विवादं कल्पसे रक्षणाय।

अतनुषु विभवेषु ज्ञातयः सन्तु नाम

त्वयि तु परिसमाप्तं बन्धुकृत्यं जनानाम्।। (शाकु० 5/8)

स्वसुख निरभिलाषः खिद्यसे लोक हेतोः

प्रतिदिनमथवा ते वृतिरेवंविधैव।

अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णम्

शमयति परितापं च्छायया संश्रितानाम्।। (शाकु०/5/7)

राज्ञा अग्निसोमरुपधारिणा भाव्यम्। अग्निरुपेण दण्ड्यान् दण्डयेत् सोमरुपेण च पाल्यान् पालयेत्। अत एव वेदे प्रार्थना कृता–

स्वस्तिपन्थामनुचरेम् सूर्याचन्द्रमसाविव। ऋग् /5/51/15

कालिदासो ऽपि अग्निसोमयोः प्रतिष्ठितान् गुणान् राजनि यथायथं प्रतिष्ठापयति शब्दान्तरेण–यथा राजानं दिलीपं वर्णयति–

भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।

अधृश्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः। रघु० 1/17

रघुंवर्णयति– स हि सर्वस्य लोकस्य युक्तदण्डतया मनः।

आददे नातिशीतोष्णो नभस्वानिव दक्षिणः।। रघु० 4/8

अजं वर्णयति– न खरो न च भूयसा मृदुः पवमानः पृथिवीरुहानिव।

(स पुरस्कृतमध्यमक्रमो नमयामास नृपान् समुद्धरन् ।। रघु० 8/9)

वेदे दण्डव्यवस्था प्रसंगे राजानमिन्द्र शब्देन निगद्य आदेशः प्रदत्तो यद् भो इन्द्रः दानववृत्याचरन्तं पुमांसमेव नापितुस्त्रियमपि जहि। यथा-

इन्द्र जहिपुर्मांस यातुधानमुत स्त्रियं मायया शाशदानाम् ।

बिग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ।। (अथर्व० 8/4/24)

रघुवंशे ताडकावधे रामः संकोचं चक्रे परं विश्वामित्रेण शास्त्रमुपदिश्य तस्य संकोचो हृतः। विगतसंकोचो रामः सपद्येव ताडकां जघान-

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी।

गन्धवद्रुधिरचन्द्रनोक्षिता जीवितेश वसतिं जगाम सा।। (रघु० 11/20)

वेदे सूक्ष्मदर्शिनो राज्ञो महत्वं प्रतिपादितम् । स एव राजा राष्ट्रं चिरं रक्षति यस्य किमप्यविदितं न भवति। रहसि गुप्तरूपेणवार्तालापं प्रकुर्वाणयोर्द्वयोः पुरुषयोरपि मनोभावनां यो वेत्ति स राजा वरुणशब्दबोध्यः। अतो वरुणरुपधारिणा राज्ञा भाव्यम् – यथा वेदमन्त्रः सम्यगुपदिशति-

यस्तिष्ठति चरति यश्च वंचति यो निलायं चरति यः प्रतङ्कम् ।

द्वौ संनिषद्य यन्मन्त्रयेते राजा तद्वेद वरुणस्तृतीयः।। (अथर्व 4/16/2)

कालिदासेन स्वराजां वर्णने अस्यैव वेदमन्त्रस्य व्याख्या कृता।

नृपतिरतिथिः व्सगुप्तचराणां नेत्रैः सर्वा राज्यस्थितिमालोकयति। यथा अभ्ररहितस्य सूर्यस्त किमप्यदृष्टं न भवति तथैव राज्ञः किमप्यदृष्टं नासीत् । यथा-

न तस्य मण्डले राज्ञः न्यस्तप्रणिधिदीधितेः।

अदृष्टमभवत् किंचिद व्यभ्रस्येव बिवस्तः।। (रघु० 17/48)

ब्रह्मक्षत्रयो समन्वय प्रसंगे

वेदेषु ब्रह्मक्षत्रयोः समन्वितं रुपं काम्यते, न केवलं ब्रह्म एव राष्ट्रं पाति नापि च केवलं क्षत्रमेव राष्ट्रं रक्षति अपितु ब्रह्मक्षत्रे मिलित्वैव राष्ट्रमुन्नेतुं प्रभवतः। यथा-

यत्र ब्रह्म च क्षत्रं च सम्यंचौ चरतः सह।

तं लोकंपुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना।। (यजुर्वेद/20/25)

कालिदासेन ब्रह्मक्षत्रयोः समन्वयवर्णने अस्मिन् मन्त्रे पूर्णाऽस्था प्रकटिता। राजनि दिलीपे ब्रह्मक्षत्रयोः समन्वयं वर्णयन् कालिदासः समुचितमेव पद्यं निर्माति- यथा-

सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।

शास्त्रेष्वकुण्ठिता बुद्धिमौर्वी धनुषि चातता।। (रघु० 1/19)

एवमेव अतिथिनृपतेः कार्यसिद्धिं वर्णयन् कालिदासः गुरौवसिष्ठे राज्ञः सायकेषु च श्रद्धां कृत्वा ब्रह्मक्षत्रयोर्महत्वमुदीरयति-

वसिष्ठस्य गुरोमन्त्राः सायकास्तस्य धन्विनः।

किं तत् साध्यं यदुभये साधयेयुर्न संगताः।। (रघु॰/17/38)

राजा अतिथिर्न केवलेन शौर्येण कार्यं साधयति नापि च केवलेन शास्त्रेणापितु स सर्वदैव ब्रह्मक्षत्रयोः समन्वितेन बलेन स्वकार्यजातानि संपादयति –

यथा–

कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् ।

अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः।। (रघु॰/17/47)

यज्ञकर्मप्रसंगे

वेदेषु स्थाने–स्थाने मन्त्रा यज्ञमहिमानमुद्गायन्ति। "इयं ते यज्ञियातनूरित्युदीर्य" मानवजीवनस्य यज्ञमयत्वमेव मन्त्रे प्रतिपादितम् । एवं विद्या बहवो मन्त्रा प्राप्यन्ते ये प्रातरपि सायमपि च यज्ञकर्मकरणाय मानवान् प्रेरयन्ति। यथा–

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यन्दिनं परि।

श्रद्धां सूर्यस्य निम्लुचि श्रद्धे श्रद्धापयेह नः।। (ऋग॰/10/151/5)

सायं सायं गृहपतिर्नो अग्निः प्रातः प्रातः सौमनसस्य दाता।

वसोर्वसोर्वसुदान एधि वयं त्वेन्धानास्तन्वं पुषेम।। (अथर्व॰ 19/55/3)

प्रातः प्रातर्गृहपतिर्नो अग्निः सायं सायं सौमनसस्य दाता।

वसोर्वसोर्वसुदान एधीन्धानास्त्वा शतं हि मा ऋधेम ।। (अथर्व॰ 19/55/4)

कालिदासो ऽपि प्रातःकालिकमेव होमवर्णनं न करोति अपितु सांयकालिकमपि होमवर्णनं करोति–

यथा–

"सायंतने सवनकर्मणि संप्रवृत्ते" (शकु॰ 3/24)

यज्ञं कुर्वन् पुरुषः पापमुक्तो भवति, यथा वेदे पापमुक्तये प्रार्थयते यज्ञकर्ता–

यद् ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये।

यदेनश्चकृमा वयमिदं तदवयजामहे।। (यजु॰ 3/45)

कालिदासस्यापि इयमेव भावना विद्यते यत् यज्ञवेदिमुपविशतः पुरुषस्य पापानां संक्षयो भवति अत एव दुरित निवारणाय प्रार्थिताः यथा– अमी वेदिं परितः क्लृप्तधिष्ण्याः

समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।

अपघ्नन्तो दुरितं हव्यवाहै–

वैंतानास्त्वां वह्नयः पावयन्तु।। (शाकु॰ 4/8)

तपोवृत्तिवर्णनप्रसंगे

तपसा मानव जीवने कान्तिविशेषः समुदेति। तपोमयं जीवनमेव लोके प्रशस्यम् ।

सर्वेषां लौकिकानामलोकिकानां चाभ्युदयानां मूले तप एव तिष्ठति। महाभारते "तपसा सर्वमाप्नुयादिति" निगद्य तपसि निष्ठा प्रदर्शिता। भद्रमिच्छद्भिर्मनुष्यैस्तपोनिष्ठैरेव राष्ट्राभ्युदयदर्शनं परजनरक्षणं वा क्रियते।

यथा–

भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे।

ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसंनमन्तु ।। (अथर्व० 19/41/1)

कविकालिदासस्यापि तपसि निष्ठा वर्तते, स जानाति यत्पूर्वं सुखतत्ववेत्तारः कल्याणपराः विद्वांसो राष्ट्राभ्युदयमिच्छन्तो ब्रह्मचर्यं परिपालयन्तो रहसि भृशं तपस्यन्ति तदनन्तरमेव राष्ट्रे बलधनादीनां पुष्टिर्जायते। कालिदासेन राज्ञो जीवने प्रजानां जीवने सर्वेषा वर्णाश्रमस्थानां मानवानां जीवने च तपोदर्शनमकारि। कालिदासस्येयं द्रढीयसी भावना विद्यते यदृषीणां तप एव राष्ट्रस्याक्षयः कोषः। अत एव शाकुन्तले दुष्यन्तः कथयति–

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तध्दनम् ।

तपः षड्भागमक्षय्यं ददत्यारण्यका हि नः ।। (शाकु० 2/14)

पंचाग्नि तपसि कालिदासः स्वास्थं प्रकटयन् ऋषिप्रवरस्य सुतीक्ष्णस्य तपो वर्णयति –

हविर्भुजामेधवतां चतुर्णां मध्येललाटन्तपसप्तसप्तिः ।

असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्तः ।। (रघु० 13/41)

शरभङ्गेन महर्षिणा यज्ञाग्निमध्यप्रक्षिप्तात्मना भुवि दुष्करं महत्तपस्तप्तम् तत्तपसा सर्वमपि तपोवनं पावनमभवत् –

अदः शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्नेः ।

चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत् ।। (रघु० 13/45)

कालिदासस्य तपस्विनो लौकिकानि वस्तून्यधिगन्तुं न तपस्यन्ति तपः। तेषां तपस्तु लौकिकाभ्युदयमतिवर्तते–

यथा–

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने,

तोये कांचनपद्मरेणुकपिशे पुण्याभिषेकक्रिया।

ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमः

यत् कांक्षन्ति तपोभिरन्य मुनयस्तस्मिस्तपस्यन्त्यमी।। (शाकु० 7/18)

कुमारसंभवे शंकरप्राप्त्यर्थं तपश्चरन्त्या पार्वत्या तु तपसो या पराकाष्ठा मुनिभिरङ्गीकृता साप्यपाकृता कृतेन तपसा–

यथा–

स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः।

तदप्यपाकीर्णमतो प्रियंवदां बदन्त्यपर्णेति च तां पुराविदः।। (कुमार० 5/28)

आदानप्रदानप्रसंगे

यदा लोके विनिमयव्यवस्था समुचिता भवति तदैव लोके सर्वेऽपि व्यवहारा निरन्तरायाः प्रवर्तन्ते। आदानप्रदान परम्परैव विनिमयशब्दवाच्या भवति। यदि वयं कामयामहे देहि मे ददामि ते नि मे धेहि नि ते दधे।

निहार च हरासि मे निहारं निहराणि ते।। (यजु० 3/50)

न केवलं मनुष्याणां मध्य एव विनिमयो भवति अपितु द्यावापृथिव्योर्मध्येऽपि विनियमयो भवति। यथा वेदे—

समानमेतदुदकमुच्चैत्यव चाहभिः

भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः।। (ऋग० 1/164/51)

वेदमनुसरता कालिदासेनापीयं विनिमयव्यवस्था द्यावापृथिव्योरुभयोर्लोकयोर्मध्ये सूक्ष्मेक्षिकया दृष्टा। द्युलोकेन पृथिवीलोकः पृथिवीलोकेन च द्यूलोकः कथं पुष्टो भवति इत्यत्र कालिदासीयः श्लोको महतीं प्रतिष्ठामावहति—

यथा—

दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।

सम्पद् विनिमयेनोभौ दधतुर्भुवनद्वयम् ।। (रघु० 1/26)

यः पुरुषः स्वल्पं गृहीत्वा तं बहुगुणीकृत्यान्येभ्यो प्रयच्छति स एव लोके कीर्तिं स्थापयति। वेदेऽपि भगवता लोकोऽयमादिष्टो भवति यत् —

शतहस्त समाहर सहस्रहस्त संकिर।

कृतस्य कार्यस्य चेह स्फातिं समावह।। (अथर्व० 3/24/5)

पुरुषेण शतहस्तेनार्जनं कर्तव्यं सहस्रहस्तेन च दातव्यमिमामेव भावनां कालिदासो लोकेशलोकयोर्मध्ये प्रतिष्ठतां शुद्धां विनिमयप्रक्रियां परिकल्पन् पुपोष—

प्रजानामेव भूत्यर्थं स ताभ्योबलिमग्रहीत् ।

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।। (रघु० 1/18)

स्वावलम्बिताप्रसंगे

केचन पुरुषाः परावलम्बिनो भवन्ति, परं वेदस्तु कथयति यत् पुरुषेणात्माभ्युदयः स्वयं विधेयः, आत्मनात्मानं रक्षन्तमेव पुरुषं जनाः प्रशंसन्ति। अपरः कश्चित्कस्यचिदपि महिमानमुत्पादयितुं नार्हति। यथा—

स्वयं वाजिंस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व।

महिमा तेऽन्येन न संनशे ।। (यजु० 23/15)

महाकविकालिदासः स्वावलम्बितयोद्योगवृत्तिमुपदिशन्नेव दिलीपस्य स्वपराक्रमरक्षितात्मनो वर्णनं रघुवंशे कृतवान् । यथा—

व्रताय तेनानुचरेण धेनोर्न्यषेधिशेषोऽप्यनुयायिवर्गः ।

न चान्यतस्तस्य शरीरक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः।। (रघु० 2/4)

पुनर्जन्मसिद्धांतविषये

जीवस्य पुनर्जन्म कर्मानुसारं भवति, शुभैः कर्मभिः शुभां योनिमापद्यते जीवः। वेदे स्पष्टतया पुनर्जन्म सिद्धांतो दृश्यते–

यथा–

द्वे सृती अश्रृणवं पितृणामहं देवानामुत मर्त्यानाम् ।

ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च।। (यजु० 19/46)

जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना स योनिः। (ऋग० 1/164/38)

कालिदासेन स्थाने स्थाने पुनर्जन्मवादः समाख्यातः। इन्दुमत्याः स्वर्गमनव्याजेन पुनर्जन्म एव समर्थितम् । पुनश्च यदा रामपरित्यक्ता सीता बाल्मीकितपोवने वसतिं करोति तथा तपश्चरन्ती सीता अन्यस्मिन् जन्मनि पुनरपि रामेण सह सम्बन्धं कामयते–

यथा–

साहं तपः सूर्यनिविष्टदृष्टिरुर्ध्वं प्रसूतेश्चरितुं यतिष्ये।

भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः।। (रघु० 14/66)

यदि कदाचित्सुखोपविष्टोऽपि पुमान् चिन्ताव्यग्रो भवति तर्हि तन्मूले जन्मन्तरेणाबद्धः कश्चिद् भावविशेष एव स्वीकर्त्तव्यः। कालिदासेन शाकुन्तले जन्मान्तराबद्धा भावना समुचित रुपेण प्रकटिता–

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् ,

पर्युत्सुकी भवति यत्सुखितोऽपि जन्तुः।

तच्चेतसास्मरति नूनमबोधपूर्वं

भावस्थिराणि जननान्तर सौहृदानि।। (शाकु० 5/21)

अतिथिसत्कारप्रसंगे

मानवजीवनपरम्परायामतिथिसत्कारस्य महत्स्थानं विद्यते। जना अतिथिं देवं मत्वा पूजयन्ति। वेदेऽपि ते मन्त्राः स्थाने स्थाने प्राप्यन्ते येषु गृहागतानतिथीन् सत्कर्तुं जनाःप्रेरिताः। यथा–

"तद्यस्यैवं विद्वान्व्रात्यो तिथिर्गृहानागच्छेत् स्वयमेनमभ्युदेत्य ब्रूयाद्व्रात्यो क्वाऽवात्सीर्वात्योदकं व्रात्य तर्पयन्तु व्रात्य यथा ते प्रियं तथास्तु व्रात्य यथा ते वशस्तथास्तु ब्रात्य यथा ते निकामस्तथास्त्विति"।। (अथर्व० 15/11/1)

गृहागतानतिथीन् केन विधिना पूजयेत् इत्यस्मिन् विषये वेदे संकेतः प्राप्यते। यथा सर्व प्रथम् –

अतिथीन्प्रतिपश्यति हिङ्.कृणोत्यभिवदति प्रस्तौत्युदकं याचत्युद्गायति। (अथर्व० 8/6/(5)8)

कालिदासो ऽपि गृहागतानामतिथीनां सत्कारेऽतीव प्रबुद्धो व्यतिभाति। यदा राजा रघुः श्रृणोति यद्वरतन्तुशिष्यः कौत्सः मामुपेतस्तर्हि स तं बहु मानयति–

तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी।

विशांपतिर्बिष्टरभाजमारात् कृतांजलिः कृत्यविदित्युवाच।। (रघु० 5/3)

कालिदासस्तु वेदनिर्दिष्टामतिथिसत्कारभावनां केवलं मनुष्येष्वेव न प्रवाहयति अपितु मुनीनामाश्रमस्थितेषु वृक्षेष्वपि अतिथिसत्कारपद्धतिं प्रदर्शयति–

यथा–

छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्य फलेष्वमीषु।

तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु।। (रघु० 13/46)

गृहमेधिनस्तद्दिनं नूनमेव दौर्भाग्यकरं भवति यस्मिन्नहनि कश्चिदतिथिर्भग्नाशः सन् गृहात्प्रतिनिवर्तते। अतिथिस्तु अदातारं परित्यज्य कमप्यन्यं दातारमुपयाति परमदातुस्तु यशोनश्यति। वेदे मन्त्रः पठ्यते–

न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः।

अपास्मात्प्रेयात्र तदोकोऽस्ति पृणन्तमन्यमरणं चिदिच्छेत् ।। (ऋग् ० 10/117/4)

कालिदासस्य रघुवंशेऽपि यदा रघुं यज्ञे विश्राणितकोशजातं विलोक्य कौत्सस्ततोऽन्यत्र गन्तुं कामयते, तदा रघुस्तं गमनादवारयन् प्रार्थयते–

गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।

गतो वदान्यान्तरमित्ययं मे मा भूत् परीबादनवावतारः ।। (रघु० 5/24)

स्वयंवर प्रसंगे

स्वयंवरप्रथा वेदानुकूलैव। वेदे सन्ति तथा विधा मन्त्रा येषु स्वेच्छया वरण व्यवस्था अस्ति। कन्या ब्रह्मचर्येण दीप्तिमती सती निजगुणकर्मयोग्यं पतिं विन्देत् , एषा वैदिकी पद्धतिः। यथा–

ब्रह्मचर्येण कन्या युवानं विन्दते पतिम् ।। (अथर्व० 11,5,18)

कालिदासेनापि गुणकर्मस्वभावबादिनीयं स्वयंवरप्रथा इन्दुमत्याः स्वयंवरकाले संजीविता। यथा–

कुलेन कान्त्या वयसा नवेन गुणैश्चतैस्तैर्विनयप्रधानैः।

त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु कांचनेन।। (रघु० 6/79)

शरीरस्य नश्वरता प्रसंगे

सर्वविदितमिदं यच्छरीरं यथोत्पद्यते तथैव लीयते। तथापि शरीरं साधनं विद्यते, साधनं विना साध्यप्राप्तिर्नैव भवति। अत एव वेदे शरीरं साधनं मत्वास्था प्रकटिता परमेकान्तविध्वंस्यस्तीति मत्वानास्थापि कृता–

यथा–

अयं लोकः प्रियतमो देवानामपराजितः।

यस्मै त्वमिह मृत्यवे दिष्टः पुरुष जज्ञिषे

स च त्वानुह्वयामसि मा पुरा जरसो मृथाः।। (अथर्व० 5,30,17)

कालिदासो मन्त्रार्धभागं तेन श्लोकेनानुसरति यत्र तपश्चरन्तीं पार्वतीमुपेत्य ब्रह्मचारी कुशलं पृच्छति–

यथा–

अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।

अपि स्वशक्त्या तपसिप्रवर्तसे शरीरमाद्यं खलुधर्मसाधनम् ।। (कुमार० 5/33)

शरीरस्य नश्वरता बोधकं मन्त्रार्धभागं तु तदा–अनुसरति यदा दिलीपः सिंह प्रार्थयते यत् नन्दिनीं मुंच मांच भुंक्ष्व। भो सिंह यदि ते मयि कृपा विद्यते तर्हि मामकीनं यशः शरीरं रक्ष न तु भौतकम् –

किमप्यहिंस्यस्तव चेन्मतोऽहं यशः शरीरे भव मे दयालुः।

एकान्त विध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ।। (रघु० 2/57)

यदा इन्दुमतीवियोगदुःखतप्तो राजा अजो जडतामुपैति तदा अजं सान्त्वयितुं वसिष्ठेन य उपदेशः प्रदत्तस्तत्र कालिदासेन तु शरीरस्य नश्वरता दार्शनिक दृष्ट्या स्वीकृता–

यथा–

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः।

क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ।। (रघु० 8/87)

स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा।

विरहः किमिवानुतापयेद्बद्बाह्यैर्विषयैर्विपश्चितम् ।। (रघु० 8/89)

आन्तिरिकरिपुदमनप्रसंगे

मनुष्याणामेष स्वभावो यत्ते स्वकंलोकंनिः शत्रुं कर्तुं कामयन्ते। यं यं शत्रुधिया ध्यायन्ति तं तमेव नाशयितुं प्रयतन्ते। परं वेदः कथयति यद्यावत् कामक्रोधादयः शत्रवो मानवानां हृदये कुसंस्कारैः परिपुष्टा भवन्ति तावद् बाह्यशत्रूणामुच्छेदः कर्तुं न शक्यते। अतः कामादीन् शत्रून् जेतुं प्रतीकमाध्यमेन वेदमन्त्रोमानवानुपदिशति–

उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुतकोकयातुम् ।

सुपर्ण यातुमुतगृध्रयातुं दृषदेव प्रमृण रक्ष इन्द्र। (अथर्व० 8,4,22)

रघुवंशे राजा अतिथिः सम्यक् परिचिनोति यथार्थभावम् । स जानाति यद् बाह्यशत्रूणां विजयापेक्षया आन्तरिकशत्रूणां विजये प्रयतश्चेत्क्रियते तर्हि वरम् । अतः कालिदासस्य राजा अतिथिर्बाह्यशत्रूणामनित्यतामन्तः शत्रूणांचनित्यातां विज्ञाय ...ममन्तः शत्रून् जेतुमेव प्रायतत–

अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः।

अतः सोऽभ्यन्तरान्नित्यान् षड्पूर्वमजयद्रिपून् ।। (रघु० 17/45)

माङ्गलिकप्रस्थानप्रसंगे

लोके यदा माङ्.गलिकप्रस्थानावसरः समायाति तदा पारिवारिका जना मङ्.गलमयानि वचांसि निगद्यानिष्टं वारयन्ति इष्टं चोद्भावयन्ति। वेदे मंगलमयी भावनेयं प्रायशो विलोक्यते–

यथा–

आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः।

उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान् ।। (अथर्व० 6,106,1)

आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः।

ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे।। (ऋग् ० 10,142,8)

शाकुन्तले यदा शकुन्तला पतिगृहं प्रयाति तदा मार्गं सुखदं कर्तुं व्योमवाचा वनदेवताभिः स्वस्तिगानं क्रियते। तत्र स्वस्त्यात्मके पद्ये कालिदासः शब्दपरिवृत्तया सह वेदमन्त्रमनुवदन्नेवास्ति। यथा–

रम्यान्तरः कमलिनी हरितैः सरोभिश्
च्छाया द्रुमैर्नियमितार्कमरीचितापः
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः।। (शाकु० 4/11)

सत्यग्रहणप्रसंगे

वेदे सत्यं स्वीकर्तुं, सत्येनैव च सर्वमुन्नतिकरं कार्यजातं साधयितुं मानवानां कृते पदे पदे सदुपदेशाः प्राप्यन्ते। सत्यमिच्छन् पुरुष आत्माभ्युदयमिव परेषामभ्युदयमपि कामयेत। सत्यमिच्छतः पुरुषस्य पुरस्तादसत्यमपि समायाति, किन्तु विविकशीलस्त्वसत्यं परित्यज्य सत्यमेव स्वीकरोति–

यथा–

सुविज्ञानं चिकितुषे जनाय सच्चासच्च बचसी पस्पृधाते।
तयोर्यत्सत्यं यतरदृजीयस्तदित् सोमोऽवति हन्त्यासत् ।। (अथर्व० 8/4/12)

कालिदासो ऽपि वेदमन्त्रस्यामुमेव भावं प्रकटयन् कथयति यत् सन्तः परीक्ष्य सत्यमसत्यं वा स्वीकुर्वन्ति, मूढ़ास्तु संसारे परप्रत्ययनेयबुद्धय एव। यथा–

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ।। (मालविका० 1/2)

गङ्.गायमुनयोः संगमवर्णने

वेदे यद्यपि निर्विशिष्टानामपि सरितां संगमाः मानवानां कल्याणभावनया वर्णिताः। मानसिकमभ्युदयं कामयमानेः पुरुषैः पर्वतसमीपवर्तिनः सरित्संगमाः सेवनीयाः। यथा–

उपव्हरे गिरीणां संगमे च नदीनाम् । धिया विप्रो अजायत।। (यजु० 26/15)

ऋग्वेदस्य परिशिष्टे तु गङ्.गायमुनयोः संगमस्य महीयान् महिमा वर्णितः। गङ्.गायमुनयोः संगमस्थले वसतिं स्नानं च विधाय जना अमृता भवन्ति– यथा श्रुतिः स्वयमेव प्रतिपादयति–

सितासिते सरिते यत्र संगथे तत्राप्लुतासो दिवमुत्पतन्ति।
ये वै तन्वं विसृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते।। (ऋग् ० परिशिष्ट, 22)

कालिदासेनापि रघुवंशस्य त्रयोदशतमे सर्गे संगम महिमा वर्णितः, एवं प्रतीयते यत् कालिदासः किंचिदिव शब्दान् परिवर्त्य वेदमन्त्रमेवानुवदति। यथा–

समुद्रपत्न्योर्जलसंनिपाते पूतात्मनामत्र किलाभिषेकात् ।
तत्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः।। (रघु० 13/58)

सन्ति ते सर्वे वेदानुगा एव। " वेदोऽखिलोधर्ममूलम् " "यः कश्चित्कस्यचिद् धर्मो मनुना परिकीर्तितः।

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।।"

इत्यादीनि मनुवाक्यानि समादृत्य कवीश्वरेण तेन वेदेष्वास्था कृता। अत एव तपोरतानां तपस्विनाम् , प्रजानुरंजनपराणां राजमानानां राज्ञाम् , ब्रह्मरुपधारिणामाचार्याणाम् , वात्सल्यवित्तानां पितॄणाम् , मन्त्रानुसंधानपराणां मन्त्रिणाम् , अपांसुलाचाराणां नारीणाम् , गुर्वाराधनपराणां पुत्राणाम् , लोकहित चिन्तनरतानामृषीणांच चरित्रं कालिदासः सावहितः सन् वेदानुसारमेवाविकलं समगायत। कविता व्याजेन कालिदासो निश्चितमेव वेदानामुद्गायकः, व्याख्याकारः, रक्षकः, प्रचारकश्चासीत् ।

अत एवाद्यापि लोके तत्साहित्यमधिगत्य जना निजजीवनं पवित्रयन्तः संजीवयन्तः परिवर्धयन्तः परिष्कुर्वन्तश्च तद्यशोगाथां गायं गायमनिर्वचनीयमानन्दमनुभवन्ति।

मीमांसा जैमिनेरात्मा

पं० पट्टाभिरामशास्त्री पद्मभूषण

विश्वोत्पत्ति–विपत्ति–संस्थितिकरेषु कार्येष्वधिकृतः परमेष्ठी तत्तत्कृतकर्मफलानुसारेण विविधान् प्राणिनस्सृजन् तेभ्य आत्मरक्षायै साधनान्यपि प्रददाति। साधनान्युपयोक्तुं परिमितं विविकमपि प्रयच्छति। इमां परमेष्ठिनोरीतिमवलम्बमाना मनीषिणः पांचभौतिकमिदं जगत् कयापि विद्यया विना शून्यमेवभवेदिति निश्चिन्वानाः विविधाविद्यास्ससर्जुः। आसु विद्यासु काश्चन वेदसापेक्षाः, काश्चन तन्निरपेक्षाः। सापेक्षाणां विद्यानां रक्षणसाधनं वेदः, निरपेक्षणांच विद्यानां स्वस्वमतिवैभवः साधनम् । मतिवैभवस्तूभयत्र साधारणः, किन्तु एकत्र समूलो मतिवैभवः, अपरत्र तु मूलरहितः। यथा हि नियतिकृतनियमरहिता महाकवीनां भारतीसृष्टिः तथैव श्रुतिमूलरहित शास्त्रजासृष्टिर्मनीषिणां न दोषाय। मनोविनोदाय कवीनां भारतीसृष्टिः, बुद्धेराहाराय मनीषिणां शास्त्रसृष्टिः। मूलराहित्यमात्रेण नात्यन्तं हेया मनीषिणां शास्त्र सृष्टिः। नैकविधाहारेण व्यायामेन च शरीरे बलपुष्टिराधीयते, तथैव बुद्धेराहारा व्यायामाय च साधनमावश्यकं भवति। जीवनायाहारं मन्यमाना बुद्धेराहारं व्यायामंच वांच्छन्ति, आहाराय जीवनमङ्.गीकुर्वाणा अपरे शरीरमेव नश्वरं पोषयितुमभिलषन्ति पशुपक्षिणः शरीरमेवात्मानमवधार्य तद्रक्षणायैव श्रृङ्.गदन्तनखादीनि दैवदत्तानि साधनानीति निर्धारयन्ति। तथैवानात्मवादिनोऽपि शरीरमेव सर्वमित्यवधार्य दैवदत्तस्यं विवेकस्य बुद्धितत्वस्य वा साधनस्य शरीररक्षण एवोपयोग इत्यवतिष्ठन्ते। जगत्स्रष्टुः परमेश्वरस्य समक्षं पश्वादिभिश्च विशेषात् इति न्यायेन सर्व एव पशवः आत्मवादिनो भवन्त्वनात्मवादिनो वा, मानवा भवन्तु दानवा वा, विवेकिनो भवन्तु मूर्खा वा, सर्वान् समं पश्यति जगत्स्रष्टा। तस्य न क्वचित् पक्षपातः, विषमदृष्टिर्वा। विषमेषु पदार्थेषु सत्सु तत्र समत्वदृष्टिर्विधेया। यदि सर्व एव समाः, तदा तत्र विषमदृष्टेः क्वावसरः? वेदसापेक्षा या विद्या व्यास–जैमिनि–गौतम–कणाद–कपिल–पतंजलि प्रवर्तिताः तास्वतप्येकरुपतां नानुभवामः। सर्वस्यापि महर्षेः भिन्नो भिन्न पन्थाः। भिन्नेषु पथिषु गच्छतामेकरुपत्वमानेतुं महर्षि–जैमिनिर्यतते–स्मृत्यधिकरणसिद्धान्तसूत्रेण– " अपिवा कर्तृसामान्यात्प्रमाणमनुमानं स्यात् " इत्यनेन। वेदोदित नियमानुसरणसामान्यं व्यासादिषु महर्षिषु समानमित्यैकरुप्यं साधितं भवति। यत्रापि श्रुतिविरुद्धा भवति स्मृतिः, तत्रापि यावत् स्मृतिमूलभूत श्रुत्युपलम्भं स्मृतेरननुष्ठानलक्षणमेवाप्रामाण्यम् , नात्यन्तिकाप्रामाण्यं जैमिनेरभिमतं भट्टपादाः प्रसाधयन्ति। एतावतैव भट्टपादा न तूष्णीं तिष्ठन्ति। ये वेदानपेक्षतया वेदविरुद्धानर्थान् ग्रन्थेषु प्रतिपादयनति तेषां विविधैस्तर्कैः साधूत्तराणि निर्दिशन्तो वेदानपेक्षदर्शनानामपि स्मृत्यधिकरणे उपनिषदर्थवादमूलत्वमभिप्रयनति। एतादृशविचार एव मीमांसापदेनोच्यते। सैव मीमांसा जैमिनेरात्मा।

महर्षिर्जैमिनिः द्वादशलक्षण्यात्मकं महान्तं प्रासादं निर्माय तत्र भगवतीं मीमांसां प्रतिष्ठाप्य रक्षति। न्यायमूर्तिर्यथाधिकरण–न्यायालये निर्णयाय समागतानां विषयाणां वादिप्रतिवादिनोः तन्नियुक्तवाक्कीलयोर्वा वाक्यानि समीक्ष्य सुविचार्य तथ्यं निश्चित्य न्यायंश्रावयति, तथैव जैमिनिरपि महान्यायवादी प्रासादं परितो विविधान् पादरुपान् प्राकारान् निर्माय तेषु चाधिकरणरुपाष्यन्तर्गृहाणि नैकविधानि परिकल्प्य तत्र निर्णयाय समागतानां सन्दिग्धविषयाणां पूर्वपक्ष्युत्तरपक्षिभिः प्रतिपाद्यमानांस्तर्कान् परिशील्य न्यायमुपदिशति। इदमेवात्मनोरक्षणं नाम।

तत्र महर्षिर्जैमिनिः सर्वप्रथमं स्वीयशास्त्रस्य विथयं तद्विचारं च प्रतिज्ञाय तत्परीक्षणाय प्रतिजानीते–तस्य निमित्त परिष्टिः इति सूत्रयन्। अनेनेदं सिद्धयति–यज्जैमिनीयं शास्त्रम् धर्मशास्त्रं विचारशास्त्रं परीक्षाशास्त्रं न्यायशास्त्रमिति नामभिः व्यवहर्तुं शक्यत इति। यथा शास्त्र्याचार्यपरीक्षासु प्रवेशं कामयमानैर्माणवकैः प्रवेशिकापरीक्षामुत्तीर्णै रेव शास्त्रिपरीक्षायां प्रवेष्टुं शक्यत इति नियमः कल्प्यते तथैवोपरितनविषयविचारेषु त एव प्रवेशमर्हन्ति ये च प्रथमपादीयविषयविचारेषु समुत्तीर्णा भवन्ति इतिधिया प्रथमपादो महर्षिणा प्रवर्तितः। अस्यां परीक्षायां समुत्तरणं तर्कप्रधानं परिगणितं परीक्षकेण महर्षिणा। वादिप्रतिवादिभिर्ये तर्का उपस्थाप्यन्ते किं ते मूलसहिताः? उत तद्रहिताः? इत्येव परीक्षा। अतएवास्य पादस्य "तर्कपाद" इति संज्ञा। यदि समूलास्तकर्तास्तदा उपरितन विचारेषु प्रवेशमर्हन्ति माणवकाः अन्यथा नार्हन्तीति समयो महर्षेः। समयपरिपालनं वादिप्रतिवादिनाम् आवश्यकम्। यथा हि उपनयनसंस्कृतास्त्रैवर्णिका एव वेदाध्ययनायाधिकारिणः परिगण्यन्ते, तथैव तर्कपादप्राकारान्तर्गृहेष्वधिकरणेषु निर्णीतसिद्धान्तनीरेण प्रक्षालिता एवोपरितनवचार विषयेषु पूर्वोत्तर पक्षिणो ऽधिकारिणः। यतो हि तर्कपादकृतसिद्धान्तसंस्कृता एव वेदोदितान् स्वस्व तर्कान् उपस्थापयितुं शक्नुयुः। मीमांसाभिमततर्केण वेदोत्थितेन भवितव्यमिति अस्ति न्यायः 'मीमांसाभिमतस्तर्कस्सर्वो वेदसमुद्भवः' इति। अधिकरणेषु विषयविचारावसरे वादिप्रतिवादिहस्तिनः स्वस्वपक्षसाधनाय महान्तं कोलाहलं कुर्युः। तत्प्रशमनायाधिकरणाध्यक्षा न्यायमूर्तयो न्यायाङ्कुशकरा भवन्तीति लोके वयमनुभवामः। तथैव जैमिनिर्महा हस्तिपः स्वहस्ते, तीक्ष्णान् न्यायाङ्.कुशान् बिभ्राणः वादिप्रतिवादिनां कोलाहलं प्रशमयति। तत्र वेदसापेक्षा भवन्तु तन्निरपेक्षा व सर्वे ऽपि तर्कपादीयविचार विषयेषु शब्द–तदर्थ तत्सम्बन्ध सम्बन्धिषु विचारार्थं समवेता भवितुमर्हन्ति। तत्र वेद निरपेक्षैः क्रियामाणानामाक्षेपाणां निरसनाय जैमिनिः वयं पंचोत्तरंशतम् इति न्यायमवलम्बते, वेदसापेक्षैः क्रियमाणाक्षेपाणां निरसनाय वयं पन्चशतं चते इति न्यायमनुसरति। एवंच वेदानुयायिनां तर्कपादेनिर्णितेषु विषयेषु सम्मत्यभावेऽपि तैस्स्वीकृतस्य विषयस्य प्रामाण्येन जैमिनेः विप्रतिपत्तिः। अतस्ते उपरितनविचारविषयेषु विचारायाधिकरणेषु प्रविशन्तु, यदि ते वेदाभिमततर्कान् उपस्थापयेयुः। ये च वेदानपेक्षिणस्ते तर्कपादविषयेषु कोलाहलमाचरन्तास्तिष्ठन्तु न ते उपरितनान्तर्गृहेष्वधिकरणेषु प्रवेष्टुं शकनुयुः। यदि च सर्वे पक्षाः वेदमूलाः प्रामाण्य-मर्हन्तीति भट्टपादोन्नीतं पन्थानमवलम्ब्य विमृशामः तदा आत्मवादिनामनात्मवादिनां सर्वेषां सर्वेष्वन्तर्गृहाधिकरणेषु प्रवेशे न कश्चन प्रत्यूहः, किन्तु तैस्तैः प्रतिपाद्यमानैस्तर्कैः वेदानुमतैर्भाव्यम्। एवं न्यायाङ्.कुशहस्तो जैमिनिः स्वात्मानं मीमांसां परिरक्षति।

तत्र तर्कपादाभिधः प्राकारो दुरधिगमः कथंचित्तमुल्लङ्.ध्यान्तः प्रवेशेलब्धेऽपि "देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्" इति रीत्या सहस्रशः प्रवर्तितेष्वध्वसु केनाध्वना गन्तव्यमिति दिग्भ्रमो जायेतैव। कथचिंद् भ्रमं दूरीकृत्य कमप्यध्वानमवलम्ब्य गन्तव्यलक्ष्यस्थानं लब्धमपि तद् भ्रममेव द्रढ़यति। "श्येनचितं चिन्वीत" इतीष्टकाभिश्चयंन विधत्ते। तादृशचयनं पृथिव्यामेव कर्तव्यम्। एवं प्राप्तं चयनम् "नपृथिव्यामग्निश्चेतव्यः" इति

निषेधः। यत्र चयनं कर्तुं न शक्यतेऽन्तरिक्षे दिवि तत्रापि निषेधः– "नान्तरिक्षे न दिवि, इति। लक्ष्यमिदं बुद्धिं भ्रामयत्येव। दाने यद्देयत्वेन विधीयते" गौश्चाश्वश्चे'ति तस्य निषेधः न केसरिणो दद्यात् इति। आहिताग्निना साम्प्रायतरग्निहोत्रं कर्तव्यम् इति विधिः, एवं पर्वकाले दर्शपूर्णमासाभ्यां यष्टव्यमिति, किन्तु सोमयागानुष्ठनावसरे 'न ददाति न जुहोति न पचति' इति निषेधः। विधेरूल्लङ्.घने प्रायश्चित्तम् यथा तथा निषेधोलङ्.घनेऽपि। विधिनिषेधोः प्रामाण्यं तुल्यम् । एवमादीनां विषयाणां विचार एवं मीमांसा। सैवच महर्षेर्जैमिनेरात्मा। आत्मरक्षायै सूत्रात्मना द्वादशलक्षणीं प्रणिनाय महर्षिः।